अभिनव-संस्कृतम्

प्रथमो भागः

[PART I]

...TAK PUBLISHING HOUSE

BOMBAY 2

ABHINAVA-SAMSKRITAM

BOOK I

दृष्टं किमपि लोकेऽस्मिन्न निर्दोषं न निर्गुणम् ।
आवृणुध्वमतो दोषान् विवृणुध्वं गुणान् बुधाः ॥

KARNATAK PUBLISHING HOUSE
BOMBAY 2

PREFACE

The introduction of the Direct Method of Teaching has brought in its train a number of specially written text-books in almost every subject at least in the Primary and Secondary stages—text-books written, re-written, revised and improved, with the natural result that a fair degree of perfection has been achieved therein. Sanskrit, however, has been one of the few subjects which till very recently had been left untouched, and the writing of text-books in Sanskrit to suit the Direct Method of Teaching may thus be said to be yet in an experimental stage. The present attempt lays its claim to one such experiment.

This is not the place to enter into a detailed discussion on the merits or otherwise of the Direct Method in the teaching of a dead language like Sanskrit. It would, however, be admitted that a wholesome and well-balanced combination of the old and new methods is bound to produce the best results.

The main object of this book is to reduce the monotony of grammar by reducing the rules to the bare minimum, and then to lead the pupil, mainly through passages given for reading, to such phases of grammar as are essential for an intelligent study of the language. Topics of grammar arising out of every lesson are thoroughly discussed in the course of that lesson. The book thus aims at co-ordinating the study of grammar and literature—an attempt hardly capable of success with separate text-books for the study of literature, grammar, composition and translation. This book presents all this material in a compact, connected and handy form.

In view of the rarity of simple prose in Sanskrit and the consequent difficulty of finding material suitable for beginners, the passages selected for reading have for the greater part been

adapted, many material changes having been introduced to suit the purposes of the book. It is hoped that the liberties so taken with standard writers will be generously condoned by critics. A few of the earlier passages have been specially written for the book.

Now a word about the treatment of formal grammar. Here too, as in the case of other points of grammar, the students are introduced to as many of the new forms as is possible in the lesson and then these forms are discussed and thoroughly fixed. The lesson following presents partly forms already fixed and partly new ones meant for discussion and study in the course of that lesson; and so on. In the treatment of conjugation of verbs very little attention is paid to the formation of bases, as it is believed that the knowledge of the formation of bases is not at all essential for obtaining the forms of the Present, the Imperfect, the Imperative and the Potential of the roots of the first, fourth, sixth and tenth conjugations. It would be enough for the students to remember the Present Third person Singular of every root and the declension of one model root in order to be able to give the other forms.

This book is intended to be the first of a series of three books and along with the Primer (पूर्वपीठिका) is expected to meet the needs of the students studying in the High School Standard IV. The other two are intended for Standards V and VI. The whole series will cover the portion of Sanskrit grammar prescribed for the Matriculation Examination of the Bombay University.

CONTENTS

Lesson	GRAMMAR	Page
1. श्रीरामस्य चरितम्।	Masculine and Neuter nouns ending in 'अ' and Feminine nouns ending in 'आ'.	1
2. सूर्यस्य।	Conjugation of verbs:—Present Tense, Parasmaipada.	5
3. नद्याः तीरम्।	Feminine nouns ending in 'ई' and 'ऊ'.	11
4. कृषीवलस्य।	Conjugation of verbs:—Present Tense, Ātmanepada.	16
5. कथयामि मदीयं वृत्तान्तम्।	Pronouns:—अस्मद् and युष्मद् ...	21
6. वसन्तस्यावतारः।	Pronouns:—किम्, एतद्, तद् and यद्	27
7. श्यामलकः अर्ध-चन्द्रेण।	Conjugation of verbs:—Imperfect Tense, Parasmaipada and Ātmanepada.	34
8. प्रार्थना।	Conjugation of verbs:—Imperative Mood, Parasmaipada and Ātmanepada.	40
9. सीतायाः राक्षसीभ्यः प्रत्युत्तरम्।	Conjugation of verbs:—Potential Mood, Parasmaipada and Ātmanepada.	45
10. प्राणदानेन प्राण-रक्षणम्।	Masculine and Neuter nouns ending in 'इ' and 'उ'.	49
11. मन्त्रसिद्धिः।	Feminine nouns ending in 'इ' and 'उ'.	55

Lesson	GRAMMAR	Page
12. ममान्वयः।	Pronouns :—सर्व, प्रथम, द्वितीय, अन्य, इतर, स्व, पर, अपर, पूर्व, एक, उभ, उभय, and द्वि.	64
13. सम्बन्धाः कस्य न प्रियाः।	Masculine, Feminine and Neuter nouns ending in 'ऋ'.	69
14. सोमः।	Pronouns :—अदस् and इदम् ...	73
15. न खलु पराक्रमोऽवस्थामपेक्षते।	... ...	78
16. नीतिसप्तकम्।	... ...	83
17. गुरुसन्देशः।	... ...	85
Appendix—Verbal Derivatives	... ...	89
Glossary.	... ...	95

INTRODUCTION.

Vowels :—

There are thirteen vowels in Sanskrit. They are:—

अ, आ, इ, ई, उ, ऊ, ऋ, ॠ, ऌ, ए, ऐ, ओ, औ.

They are classified as under:—

Short vowels :— अ, इ, उ, ऋ, ऌ.

Long vowels :— आ, ई, ऊ, ॠ.

Diphthongs :— ए, ऐ, ओ, औ.

Besides these there are two more sounds known as :—

Anuswāra (ं) and Visarga (:)

The following table shows the *Guṇa* and *Vṛiddhi* substitutes of the vowels.

Vowels	*Guṇa* substitutes	*Vṛiddhi* substitutes
अ	×	आ
इ or ई	ए	ऐ
उ or ऊ	ओ	औ
ऋ or ॠ	अर्	आर्
ऌ	अल्	आल्

Consonants :—

There are thirty-three consonants. These are classified as under :—

Name of the class	Hard consonants		Soft consonants		
	Un-aspirates	Aspirates	Un-aspirates	Aspirates	Nasals
Gutturals	क्	ख्	ग्	घ्	ङ्
Palatals	च्	छ्	ज्	झ्	ञ्
Linguals	ट्	ठ्	ड्	ढ्	ण्
Dentals	त्	थ्	द्	ध्	न्
Labials	प्	फ्	ब्	भ्	म्

Semi-vowels :— य्, र्, ल्, व्......(Soft)

Sibilants :— श्, ष्, स् ... ... (Hard)

Aspirate :— ह्.............. (Soft)

When two or more consonants come together without a vowel between any two of them, we get a conjunct consonant.

A letter standing at the beginning of a word is called the *initial* letter; one standing at the end is called the *final* letter; and one that is last but one is called the *penultimate* letter.

Roots :—

Roots in Sanskrit are divided into ten groups known as *Gaṇas*.

Each root can be conjugated in all the tenses and moods which together are ten in number.

In these tenses and moods there are two sets of terminations known as *padas*. One set is known as *Parasmaipada* and the

other is known as *Ātmanepada.* Some roots (*Parasmaipadin*) take only the first, some (*Ātmanepadin*) take only the second and some (*Ubhayapadin*) take both.

The person, the number and the gender :—

There are three persons—the first, the second, and the third.

Unlike other languages, Sanskrit has got three numbers: the singular denoting one, the dual denoting two, and the plural denoting more than two.

There are three genders—the masculine, the feminine, and the neuter; but the genders assigned to nouns are arbitrary and are therefore to be studied from the dictionary.

Nouns, pronouns and adjectives :—

Unlike adjectives, the nouns are to be declined in their own genders. There are eight cases in Sanskrit, and a noun or an adjective can be declined in all these eight cases, while pronouns are not declined in the Vocative. The following table gives the cases and their functions:—

Name	Functions (कारक)	Significance	To be translated into English by-
प्रथमा The Nominative	कर्ता	(1) The naming case. (2) Denotes the Subject.	——
द्वितीया The Accusative	कर्म	(1) Denotes the object.	——
तृतीया The Instrumental	करणम्	Denotes :— (1) The agent (2) The Instrument (3) The means.	(1) with (2) by (3) by means of.
चतुर्थी The Dative	सम्प्रदानम्	(1) Indicates the direction in which the action denoted by the verb takes place. (2) The purpose.	(1) to (2) for
पञ्चमी The Ablative	अपादानम्	Denotes :— (1) Separation (2) Source (3) Motive	(1) from (2) out of
षष्ठी The Genitive	सम्बन्धः	(1) Denotes Possession	(1) of (2) belonging to.
सप्तमी The Locative	अधिकरणम्	(1) Denotes the place or the situation of a thing.	(1) in (2) on (3) among (4) between (5) in the midst of.
सम्बोधनम् The Vocative	सम्बोधनम्	(1) The Nominative of address.	——

Adjectives can be declined in all the three genders. They agree in all respects (gender, number, and case) with the nouns they qualify.

The Indeclinables:—

These do not undergo any changes. They are used in a sentence in their original form.

The following is the transliteration scheme followed in the book:—

अ (a) आ (ā) इ (i) ई (ī) उ (u) ऊ (ū) ऋ (ṛi) ऌ (ḷ) ए (e) ऐ (ai) ओ (o) औ (ou) अनुस्वार (ṃ) विसर्ग (ḥ) क् (k) ख् (kh) ग् (g) घ् (gh) ङ् (ṅ) च् (c) छ् (ch) ज् (j) झ् (jh) ञ् (ñ) ट् (ṭ) ठ् (ṭh) ड् (ḍ) ढ् (ḍh) ण् (ṇ) त् (t) थ् (th) द् (d) ध् (dh) न् (n) प् (p) फ् (ph) ब् (b) भ् (bh) म् (m) य् (y) र् (r) ल् (l) व् (v) श् (ś) ष् (ṣ) स् (s) ह् (h).

ERRATA

Page	*Line*	*Incorrect*	*Correct*
30	6	Honec-bee	Honey-bee
35	14	Explative	Expletive
39	12	them.	them
39	12	gods	gods.
49	25	वित्रस्तश्शि वेस्समीप	वित्रस्ताश्शिवेस्समीप
55	9	कीर्तिम्भृशं	कीर्तिर्भृशं
60	18	पूङ्ग;	पङ्गू;
91	30	पायितुम्	पारयितुम्
94	8	विस्तुर्मम्	विस्मर्तुम्

प्रथमः पाठः

श्रीरामस्य चरितम्।

पुरा दशरथः नाम नृपः। रामः, भरतः, लक्ष्मणः, शत्रुघ्नः च तदीयाः पुत्राः। कौसल्या रामस्य अम्बा। सीता रामस्य भार्या। सीता जनकस्य नाम नृपस्य कन्या। जनकः मिथिलायाः नृपः। दशरथः तु अयोध्यायाः नृपः।

भरतस्य कृते, दशरथस्य आदेशेन रामः वनम् गतः। तत्र दण्डकायाम् रावणेन सीता दृष्टा। कनकमृगम् दृष्ट्वा, रामः मुग्धः जातः। ततः सीता दुष्टेन रावणेन हृता, लङ्काम् नीता च। अनन्तरम् लक्ष्मणेन सह, रामः लङ्काम् गतः। रावणम् हत्वा, सीतया सह, अयोध्याम् पुनः रामः प्रत्यागतः। श्रीरामाय नमः।

VOCABULARY

अनन्तरम् (*Indecl.*) Afterwards.

अम्बा (*f.*) Mother.

आदेश (*m.*) An order; a command.

कृते (*Indecl.*) For; for the sake of. [Used with the Genitive of a noun.]

गत (*pp. pass.*) Gone.

च (*Indecl.*) And.

जात (*pp. pass.*) Born; become.

ततः (*Indecl.*) Then; thence.

तत्र (*Indecl.*) There.

तदीय (*Adj.*) Belonging to him, her, or that.

तु (*Indecl.*) But. [Never used at the beginning of a sentence.]

दृष्ट (*pp. pass.*) Seen.

दृष्ट्वा (*Ger.*) Having seen.

नमः (*Indecl.*) Bow to! [Used with the Dative of a noun.]

नाम (*Indecl.*) Named; by name. [Used between two nouns in the same case.]

नीत (*pp. pass.*) Carried; taken away.

पुरा (*Indecl.*) Formerly.

प्रत्यागत (*pp. pass.*) Returned.

मुग्ध (*pp. pass.*) Infatuated.

सह (*Indecl.*) With; accompanied by. [Used with the Instrumental of a noun.]

हत्वा (*Ger.*) Having killed.

हृत (*pp. pass.*) Taken away.

GRAMMAR:—

1. 'भूप', Masculine noun ending in 'अ'.

	Sing.	Du.	Pl.
N.	भूपः	भूपौ	भूपाः
Ac.	भूपम्	भूपौ	भूपान्
I.	भूपेन	भूपाभ्याम्	भूपैः
D.	भूपाय	भूपाभ्याम्	भूपेभ्यः
Ab.	भूपात्	भूपाभ्याम्	भूपेभ्यः
G.	भूपस्य	भूपयोः	भूपानाम्
L.	भूपे	भूपयोः	भूपेषु
V.	भूप	भूपौ	भूपाः

Masculine nouns ending in 'अ' such as आदेश, दशरथ, etc. are declined similarly.

2 'राम', Masculine noun ending in 'अ'.

	Sing.	Du.	Pl.
N.	रामः	रामौ	रामाः
Ac.	रामम्	रामौ	रामान्
I.	रामेण	रामाभ्याम्	रामैः
D.	रामाय	रामाभ्याम्	रामेभ्यः
Ab.	रामात्	रामाभ्याम्	रामेभ्यः
G.	रामस्य	रामयोः	रामाणाम्
L.	रामे	रामयोः	रामेषु
V.	राम	रामौ	रामाः

Words like नृप, कनकमृग, etc. are declined similarly. (See S-R. No. 1 below.)

3. 'सीता', Feminine noun ending in 'आ'.

	Sing.	Du.	Pl.
N.	सीता	सीते	सीताः
Ac.	सीताम्	सीते	सीताः
I.	सीतया	सीताभ्याम्	सीताभिः
D.	सीतायै	सीताभ्याम्	सीताभ्यः
Ab.	सीतायाः	सीताभ्याम्	सीताभ्यः
G.	सीतायाः	सीतयोः	सीतानाम्
L.	सीतायाम्	सीतयोः	सीतासु
V.	सीते	सीते	सीताः

Feminine nouns ending in 'आ' such as अयोध्या, कन्या, etc. are declined similarly. But the Vocative singular of अम्बा is अम्ब. In other respects it is declined like सीता.

4. 'वन', Neuter noun ending in 'अ'.

	Sing.	Du.	Pl.
N.	वनम्	वने	वनानि
Ac.	वनम्	वने	वनानि
I.	वनेन	वनाभ्याम्	वनैः
D.	वनाय	वनाभ्याम्	वनेभ्यः
Ab.	वनात्	वनाभ्याम्	वनेभ्यः
G.	वनस्य	वनयोः	वनानाम्
L.	वने	वनयोः	वनेषु
V.	वन	वने	वनानि

Neuter nouns ending in 'अ' such as जल, धन, etc. are declined similarly.

SANDHI RULES :—

S. R. No. 1. 'न्' preceded by ऋ, ॠ, or ष् in the same word is changed to 'ण्', if a letter of the *palatal, lingual or dental* class, or ल्, श्, or स्, does not come between ऋ, ॠ, or ष्, and 'न्'; but this change does not take place when 'न्' stands at the end of a word.

E. g.

करेण; शिष्याणाम्; पुष्पाणि; etc. But दशरथेन; करान्; etc.

LANGUAGE-STUDY:—

१ रामः वनम् गतः — Rāma went to the forest.

रामः दशरथस्य पुत्रः — Rāma is the son of Daśaratha.

दुग्धम् मधुरम् — Milk is sweet.

From the above sentences it will be seen that in Sanskrit nouns, adjectives and their equivalents can be used as simple predicates.

२ रामः मृगम् दृष्ट्वा मुग्धः जातः ।
सीता दुष्टेन रावणेन हृता ।

In the above sentences adjectives have been used. It will be seen that the adjectives agree in *number, gender and case* with the nouns qualified by them.

The feminine bases of adjectives ending in 'अ' are formed by changing their final 'अ' to 'आ'. These adjectives are declined like 'भूप' in the masculine gender, like 'सीता' in the feminine gender, and like 'वन' in the neuter gender.

३ तदीयः पुत्रः रामः ।
तदीयौ पुत्रौ रामः लक्ष्मणः च ।
तदीयाः पुत्राः रामः लक्ष्मणः भरतः शत्रुघ्नः च ।

The above illustrations show that, if there are several nouns qualified by the same adjective, the number of such adjective depends upon the combined number of the nouns qualified by it.

PECULIAR CONSTRUCTIONS:—

१ दशरथः **नाम** नृपः।

२ रामः लक्ष्मणः भरतः शत्रुघ्नः **च** तदीयाः पुत्राः।

३ दशरथः **तु** अयोध्यायाः नृपः।

४ भरतस्य **कृते** रामः वनम् गतः।

५ लक्ष्मणेन **सह** रामः लङ्काम् गतः।

६ श्रीरामाय **नमः**।

N. B. Here as well as in the case of peculiar constructions noted in other lessons, a reference to the glossary given at the end of this book will help the student to find out the peculiarities of the words printed in bold type.

ADDITIONAL EXERCISES:—

अलसस्य कुतः[1] विद्या, अविद्यस्य कुतः धनम्।
अधनस्य कुतः मित्रम्, अमित्रस्य कुतः सुखम्॥
पादपानाम्[2] भयम् वातात्[3], पद्मानाम् शिशिरात्[4] भयम्।
पर्वतानाम् भयम् वज्रात्, नराणाम् दुर्जनात् भयम्॥

HOME-WORK:—

(A) Fill in the blanks by using the proper forms of the adjectives given in brackets:—

१ दशरथस्य कौसल्या—भार्या (प्रिय)।

२ रावणः—राक्षसः (दुष्ट)।

३ —(दुष्ट) रावणेन—(समृद्ध) लङ्काम् सीता—(नीत)।

४ —(क्रुद्ध) रामः लङ्काम्—(गत)।

५ —(सुन्दर) कनकमृगम् दृष्ट्वा सीता—(मोहित)।

(B) Decline the following words fully:—

लङ्का, दशरथ, नीत.

---

1 Whence; 2 A tree; 3 The wind; 4 The winter.

द्वितीयः पाठः

सूर्यस्य ।

सूर्यः प्रभाते उदयति । उदयात् प्रभृति सूर्यस्य प्रकाशः भुवने प्रसरति । सूर्यस्य अतीव चण्डः प्रकाशः जनानाम् तापाय एव भवति । किन्तु सूर्यस्य प्रकाशात् विना मानवाः न जीवन्ति ।

सूर्यस्य उदयात् प्रभृति जनाः निजानि कार्याणि आचरन्ति । कृषीवलाः क्षेत्राणि गच्छन्ति, बलीवर्दानाम् साहाय्येन क्षेत्राणि कृषन्ति च । सूर्यस्य आतपेन क्षेत्राणि तपन्ति, वपनाय योग्यानि भवन्ति च ।

विहगाः प्रभाते मधुरैः स्वरैः गायन्ति, नृत्यन्ति, आकाशे उत्पतन्ति, कीटान् अन्विष्य भक्षयन्ति च ।

वृक्षाः लताः च सूर्यस्य प्रकाशे रोहन्ति । मारुतः च शुद्धः भवति ।

सूर्यस्य प्रखरेण आतपेन समुद्रस्य जलम् शुष्यति । समुद्रस्य जलम् मेघस्य रूपेण परिणमति । ततः मेघेभ्यः पर्जन्यः पतति । सूर्यः एव पर्जन्यस्य कारणम् अस्ति । मनुष्याणाम् जीवनस्य च कारणम् अस्ति । अतः जनाः सूर्यम् वर्णयन्ति, पूजयन्ति, ध्यायन्ति, नमन्ति च ।

VOCABULARY

अतः (*Indecl.*) Hence.
अतीव (*Indecl.*) Very much.
अन्विष्य (*Ger.*) Having searched.
आतप (*m.*) The sunshine; the heat of the sun.
उत् + पत् [उत्पतति] To jump.
एव (*Indecl.*) Only.
किन्तु (*Indecl.*) But.
कीट (*m.*) An insect.
कृष् [कर्षति] To drag; To plough.
कृषीवल (*m.*) A farmer.
क्षेत्र (*n.*) A field.
गै [गायति] To sing.
चण्ड (*Adj.*) Hot; unbearable.
ध्यै [ध्यायति] To meditate upon.
निज (*Adj.*) One's own
परि + नम् [परिणमति] To become ripe; to be changed into; to appear in a different form.
प्रभृति (*Indecl.*) Since. [Used with the Ablative of a noun.]
बलीवर्द (*m.*) An ox.
रुह् [रोहति] To grow.
वपन (*n.*) Sowing.
विना (*Indecl.*) Without. [Used with the Acc., Instr. or Abl. of a noun.]
शुष् [शुष्यति] To dry up.

GRAMMAR :—

Parsmaipada PRESENT TENSE.

Terminations :—	Sing.	Du.	Pl.
First person	मि	वस्	मस्
Second person	सि	थस्	थ
Third person	ति	तस्	अन्ति

Rules:—

1. The preceding 'अ' becomes 'आ' when followed by terminations beginning with 'म्' and 'व्'.
2. The final 'स्' of the terminations is changed to *Visarga.*
3. The preceding 'अ' is dropped while adding the termination of the Third person plural.

First Conjugation:—

Sign of the conjugation:—'अ'.

Rules:—(1) When the sign is added to the root, the penultimate short vowel of the root takes its *Guṇa* substitute.

(2) The final vowel (short or long) takes its *Guṇa* substitute.

भू

भवामि	भवावः	भवामः
भवसि	भवथः	भवथ
भवति	भवतः	भवन्ति

The roots सृ, जीव्, चर्, etc. are similarly conjugated

Fourth Conjugation:—

Sign of the conjugation:—'य'.

Rule:—No changes take place when the sign is added to the root.

शुष्

शुष्यामि	शुष्यावः	शुष्यामः
शुष्यसि	शुष्यथः	शुष्यथ
शुष्यति	शुष्यतः	शुष्यन्ति

नृत् and others are similarly conjugated

Sixth Conjugation:—

Sign of the conjugation:—'अ'.

Rule:—No changes take place when the sign is added to the root.

कृष्

कृषामि	कृषावः	कृषामः
कृषसि	कृषथः	कृषथ
कृषति	कृषतः	कृषन्ति

विश् and others are similarly conjugated.

Tenth Conjugation :—

Sign of the conjugation:—'**अय**'.

Rule:— (1) When the sign is added to the root, the penultimate '**अ**' is changed to its *Vridhi* substitute.

Exceptions :—कथ् , गण् , रच् , ग्रथ्, etc.

Rule :—(2) When the sign is added to the root any other penultimate short vowel but '**अ**' takes its *Guṇa* substitute.
Exception :—**स्पृह्**.

Rule :— (3) All final vowels take their *Vridhi* substitutes before the sign.

मार्ग्

मार्गयामि	मार्गयावः	मार्गयामः
मार्गयसि	मार्गयथः	मार्गयथ
मार्गयति	मार्गयतः	मार्गयन्ति

The roots **वर्ण् , पूज्** , etc. are similarly conjugated.

Second conjugation:—

अस् (Irregular)

अस्मि	स्वः	स्मः
असि	स्थः	स्थ
अस्ति	स्तः	सन्ति

LANGUAGE-STUDY: —

1. There are certain prefixes which are joined to the roots. When these are joined to the roots, they sometimes bring about a change in the meaning of the roots and sometimes they bring about a change in their *Padas*. In many cases they are simply added on as ornaments.

E. g.	हृ	Parasmaipada	To take away.
	वि + हृ	,,	To sport.
	सम् + हृ	,,	To destroy; to collect.
	आ + हृ	,,	To bring.
	प्र + हृ	,,	To strike.
	अप + हृ	,,	To remove (by force)
	वि + आ + हृ	,,	To speak.
	उप + हृ	,,	To offer.
	स्था	,,	To stand.
	प्र + स्था	Ātmanepada	To start.
	रम्	,,	To sport.
	वि + रम्	Parasmaipada	To desist; to stop.

PECULIAR CONSTRUCTIONS :—

१ उदयात् प्रभृति सूर्यस्य प्रकाशः भुवने प्रसरति ।
२ सूर्यस्य प्रकाशात् विना मानवाः न जीवन्ति ।

ADDITIONAL EXERCISES :—

साक्षराः[1] विपरीताः[2] चेद्[3], राक्षसाः एव केवलम् ।
सरसः[4] विपरीतः चेद्, सरसत्वम् न मुञ्चति[5] ॥
अधनाः धनम् इच्छन्ति[6], वादम्[7] इच्छन्ति गर्विताः ।
मानवाः स्वर्गम् इच्छन्ति, मोक्षम् इच्छन्ति देवताः ॥

TRANSLATE :—

There is a mountain by name Himālaya. Himālaya is to the north of Āryāvarta. Himālaya is a lofty mountain. Himālaya is the lord of all mountains. Himālaya means the store-house of snow.

[1 The educated; 2 Inverted; 3 If; 4 The appreciative one; 5 To give up; 6 To wish; 7 Discussion.]

The Ganges rises in the Himālaya. The Ganges joins the sea. The channel of the Ganges is very broad. Many boats sail on the water of the Ganges. Many people bathe in the water of the Ganges.

New words :—पर्वतः ; आर्यावर्तः ; उत्तरेण; तुङ्ग; हिमम् ; आलयः ; उद्+भू ; मिल् ; पात्रम् ; विशाल; नौका; चल् ; पुष्कल; स्नानम् आ+चर् .

HOME-WORK :—

1. Write five sentences describing a forest or the cultivated fields.

2 (*a*) Conjugate fully :—ध्यै and भक्ष्.

(*b*) Decline fully :—नौका.

तृतीयः पाठः

नद्याः तीरम् ।

अद्य नद्याः तीरम् गच्छामः । अत्र एव नदी अस्ति । क्षणेन एव नदीम् प्राप्ताः । अहो अतीव मनोहरम् दृश्यम् । नद्याः नीले जले नौकाः पटान् प्रसार्य आकाशे विहगाः इव विहरन्ति । तीरे वृक्षाः विकसितैः पुष्पैः सम्पन्नाः हसन्ति इव । नदी वृक्षान् जननी इव सदा पुष्यति । नद्या उपकृताः वृक्षाः उपकारम् स्मृत्वा, पुष्पाणि नद्याः जले विकीर्य, नदीम् महयन्ति । क्वचित् वृक्षाणाम् छायासु विहगाः चञ्चुभिः कीटान् अन्विष्य भक्षयन्ति । क्वचित् च वृक्षाणाम् शाखासु कूजन्ति । ग्रामिकाणाम् वध्वः शीर्षेषु ललितान् कुम्भान् विन्यस्य नदीम् प्रति प्रस्थिताः सारमेयैः अनुगताः सलीलम् पदानि क्षिपन्ति, मन्दम् मन्दम् चलन्ति च । नद्याः तीरम् आसाद्य चिरम् गोष्ठीः कृत्वा

नद्याः जलम् आदाय श्वश्रूभ्यः भयात् इच्छाम् विना पुनः गृहम् परागच्छन्ति। नद्याः निश्चले जले निविष्टः सूर्यस्य अरुणः आतपः नेत्रम् आकर्षति । चञ्चलाः मत्स्याः उत्पतन्ति। मत्स्यानाम् तन्वः सूर्यस्य आतपे रत्नैः खचिताः इव विलसन्ति। एवम् सौन्दर्यस्य अगारम् एव नदी। यथा नदी सौन्दर्यस्य अगारम् तथा जनानाम् जीवनस्य साधनम् अपि । यतः नदीम् उभयतः पृथ्वी सस्यैः समृद्धा भवति।

VOCABULARY

अगार (*n.*) A store house; a house.
अत्र (*Indecl.*) Here.
अद्य (*Indecl.*) Today.
अनुगत (*pp. pass.*) Followed.
अरुण (*Adj.*) Reddish; tawny.
अस् [अस्ति] To be.
आदाय (*Ger.*) Having taken.
आसाद्य (*Ger.*) Having reached.
इव (*Indecl.*) Like; as if.
उभयतः (*Indecl.*) On both sides. [Used with the Accusative of a noun.]
कूज् [कूजति] To warble; to sing.
कृत्वा (*Ger.*) Having done.
क्षिप् [क्षिपति] To throw. [Used with the Locative of the person or thing at whom or which thrown.]
ग्रामिक (*m.*) A villager.
तनू (*f.*) The body.
निविष्ट (*pp. pass.*) Seated; resting.
पट (*m.*) A sail; cloth.
परा + गम् [परागच्छति] To return.
पुष् [पुष्यति] To nourish.
प्रति (*Indecl.*) Towards. [Used with the Accusative of a noun.]
प्रसार्य (*Ger.*) Having spread out.
प्रस्थित (*pp. pass.*) Started.
प्राप्त (*pp. pass.*) Reached.
मह् [महयति] To worship; to praise.
ललित (*Adj.*) Beautiful.
वधू (*f.*) A woman; a daughter-in-law.
विकीर्य (*Ger.*) Having scattered.
विन्यस्य (*Ger.*) Having placed.

वि + लस् [विलसति] To shine; to sparkle.
वि + हृ [विहरति] To sport.
सलीलम् (*Indecl.*) sportively.
सस्य (*n.*) Corn.
सारमेय (*m.*) A dog.
स्मृत्वा (*Ger.*) Having remembered.

GRAMMAR :—

5 'जननी', Feminine noun ending in 'ई'.

	Sing	Du.	Pl.
N.	जननी	जनन्यौ	जनन्यः
Ac.	जननीम्	जनन्यौ	जननीः
I.	जनन्या	जननीभ्याम्	जननीभिः
D.	जनन्यै	जननीभ्याम्	जननीभ्यः
Ab.	जनन्याः	जननीभ्याम्	जननीभ्यः
G.	जनन्याः	जनन्योः	जननीनाम्
L.	जनन्याम्	जनन्योः	जननीषु
V.	जननि	जनन्यौ	जनन्यः

Feminine nouns ending in ई such as नदी, पत्नी, etc. are similarly declined. But the Nominative sing. of 'लक्ष्मी' is लक्ष्मीः; in other respects it is declined like 'जननी'.

6 'वधू', Feminine noun ending in 'ऊ'.

	Sing.	Du.	Pl.
N.	वधूः	वध्वौ	वध्वः
Ac.	वधूम्	वध्वौ	वधूः
I.	वध्वा	वधूभ्याम्	वधूभिः
D.	वध्वै	वधूभ्याम्	वधूभ्यः
Ab.	वध्वाः	वधूभ्याम्	वधूभ्यः
G.	वध्वाः	वध्वोः	वधूनाम्
L.	वध्वाम्	वध्वोः	वधूषु
V.	वधु	वध्वौ	वध्वः

Feminine nouns ending in 'ऊ' such as श्वश्रू, तनू, etc. are similarly declined.

LANGAUGE-STUDY :—

१ नदी एव सौन्दर्यस्य अगारम् ।
सूर्यः पर्जन्यस्य कारणम् ।
नदी मानवानाम् जीवनस्य साधनम् ।

In sentences like these the forms of अस् or भू are understood. In such cases an adjective or a noun is used as a predicate. If an adjective is so used, it agrees with the subject in all respects;

but if it is a noun, it must be used *in its own gender and number* and must be made to agree with the subject only in *case* i. e. its case must be the *Nominative*, the case of the subject.

In the above sentences the words अगार, कारण and साधन, have been used in their own genders.

PECULIAR CONSTRUCTIONS :—

१ क्वचित् विहगाः कीटान् भक्षयन्ति, कचित् च वृक्षाणाम् शाखासु कूजन्ति ।

२ श्वश्रूभ्यः भयात् इच्छाम् विना वध्वः गृहम् परागच्छन्ति ।

३ नदीम् उभयतः पृथ्वी सस्यैः समृद्धा भवति ।

४ यथा नदी सौन्दर्यस्य अगारम्, तथा जनानाम् जीवनस्य साधनम् अपि ।

ADDITIONAL EXERCISES :—

पुत्रसूः[1], पाककुशला[2], पवित्रा च पतिव्रता ।
पद्माक्षी[3] पञ्चपैः[4] नारी पृथ्व्याम् गच्छति गौरवम्[5] ॥
हस्तस्य भूषणम् दानम्, सत्यम् कण्ठस्य भूषणम् ।
श्रोत्रस्य[6] भूषणम् शास्त्रम्, भूषणैः किम् प्रयोजनम् ॥
उदारस्य तृणम् वित्तम्, शूरस्य मरणम् तृणम् ।
विरक्तस्य तृणम् भार्या, निःस्पृहस्य[7] तृणम् धरा[8] ॥

TRANSLATE :—

Pārvatī is the daughter of Himālaya. Pārvatī is the wife of Śaṅkara. Gajānana and Ṣaḍānana are the two sons of Pārvatī. Ṣaḍānana became the commander of the forces of the gods.

[1 Giving birth to sons; 2 Expert in cooking; 3 Having eyes resembling lotuses; 4 Five पकारs (with these five words beginning with the letter प); 5 Greatness; 6 The ear; 7 One who is free from worldly attachment; 8 The earth.]

Senā is the wife of Ṣadānana. Gajānana became the lord of all the arts. Vidyā is the daughter of Bramhadeva. Vidyā is not the wife of Gajānana. Vidyā is a virgin. The vehicle of Śaṅkara is an ox; that of Ṣadānana is a pea-cock; that of Gajānana is a mouse; and that of Pārvatī is a lion. A bow to Śaṅkara !

New Words :—कन्या; देवः; सेनानायकः; भूत; अखिल; कला; न; कुमारी; वाहनम्; वृषभः; मयूरः; मूषिकः; सिंहः; इति.

HOME-WORK :—

1. Decline the following words fully :—
   पार्वती, सेना and **तनू.**

2. Pick out the subject, the object and the predicate from the following sentences and arrange them in a table as shown in the example worked out.

Sentence :—नदी वृक्षान् जननी इव सदा पुष्यति ।

Subject.	Object.	Predicate.
नदी	वृक्षान्	पुष्यति

Sentences :—

१ नद्या उपकृताः वृक्षाः उपकारम् स्मृत्वा नदीम् महयन्ति ।

२ चञ्चलाः मत्स्याः उत्पतन्ति ।

३ ग्रामिकाणाम् वध्वः गृहम् परागच्छन्ति ।

४ कृषीवलाः बलीवर्दानाम् साहाय्येन क्षेत्राणि कृषन्ति ।

५ सूर्यस्य प्रकाशः जनानाम् तापाय एव भवति ।

चतुर्थः पाठः

कृषीवलस्य ।

कृषीवलः प्रभाते सूर्यस्य उदयात् प्राक् उत्तिष्ठति । ततः दन्तान् धावित्वा, मुखम् मार्जयित्वा, शौचम् आचर्य, कृषीवलः क्षेत्रम् प्रक्रमते । अत्रान्तरे सूर्यः उदयम् अयते ।

तत्र क्षेत्रे बलीवर्दान् हले प्रयुज्य कृषीवलः क्षेत्रम् कृषति । तत्र मध्याह्ने विश्रमार्थम् मुहूर्तम् कृषीवलः कर्षणात् विरमति । खाद्यम् च भक्षयित्वा, बुभुक्षाम् सान्त्वयते । पुनः च बलीवर्दानाम् साहाय्येन पृथ्वीम् कर्षति । ततः कृष्टायाम् पृथिव्याम् धान्यम् वपते । देवस्य प्रसादेन धान्यम् उत्पद्यते । धान्यम् लोकानाम् रक्षणाय कल्पते । एवम् कृषीवलः जनानाम् कृते प्रतिदिनम् यतते । सायङ्काले गृहम् आगत्य, गृहिणीम् बालान् च विलोक्य भृशम् मोदते ।

गृहिणी अन्नम् पचति, गृहकृत्यानि आचरति च । गृहिणीम् विना मानवस्य जीवितम् व्यर्थम् वर्तते, विशेषतः तु कृषीवलस्य ।

कुक्कुटाः सारमेयाः, बलीवर्दाः च कृषीवलस्य धनम्।

निशायाम् भोजनस्य अवसाने, मित्रैः सह गोष्ठीः कृत्वा शयनम् भजते। अत्र भारतवर्षे कृषीवलाः दारिद्र्ये जायन्ते, दारिद्र्ये वर्धन्ते, दारिद्र्ये एव म्रियन्ते। सुखस्य लेशम् अपि न लभन्ते। अहो दौर्भाग्यम् भारतवर्षस्य।

VOCABULARY

अत्रान्तरे (*Indecl.*) In the meanwhile.

अवसान (*n.*) The close; the end.

आगत्य (*Ger.*) Having come.

आचर्य (*Ger.*) Having performed.

उत् + पद् [उत्पद्यते] To be produced; to be born.

उत् + स्था [उत्तिष्ठति] To get up.

एवम् (*Indecl.*) Thus; in this way.

कुक्कुट (*m.*) A cock.

कृष् [कृषति] To plough; to drag.

कृष्ट (*pp. pass.*) ploughed; dragged.

क्लृप् [कल्पते] To be able. [Used with the Dative of a noun.]

जन् [जायते] To be born; to be produced.

धावित्वा (*Ger.*) Having washed.

पच् [पचति] To cook.

प्र + क्रम् [प्रक्रमते] To proceed.

प्राक् (*Indecl.*) Before. [Used with the Ablative of a noun.]

बुभुक्षा (*f.*) Hunger.

भज् [भजते] To take resort to.

भृशम् (*Indecl.*) Exceedingly.

मार्जयित्वा (*Ger.*) Having washed.

मुद् [मोदते] To rejoice; to be pleased.

मृ [म्रियते] To die.

यत् [यतते] To strive for; to try.

लभ् [लभते] To obtain; to get.

वप् [वपते] To sow.

वि + रम् [विरमति] To stop; to desist. [Used with the Ablative of a noun.]

विलोक्य (*Ger.*) Having seen.

वृत् [वर्तते] To be.

वृध् [वर्धते] To grow.

GRAMMAR :—

PRESENT TENSE.

Ātmanepada.

Terminations :—

	Sing.	Du.	Pl.
First person	इ	वहे	महे
Second person	से	इथे	ध्वे
Third person	ते	इते	अन्ते

All rules given under the Parasmaipada terminations are applicable in the case of these also.

First conjugation

क्रम्

क्रमे	क्रमावहे	क्रमामहे
क्रमसे	क्रमेथे	क्रमध्वे
क्रमते	क्रमेते	क्रमन्ते

Fourth conjugation

जन् (जा)

जाये	जायावहे	जायामहे
जायसे	जायेथे	जायध्वे
जायते	जायेते	जायन्ते

Sixth conjugation

मृ (म्रिय्)

म्रिये	म्रियावहे	म्रियामहे
म्रियसे	म्रियेथे	म्रियध्वे
म्रियते	म्रियेते	म्रियन्ते

Tenth conjugation

सान्त्व्

सान्त्वये	सान्त्वयावहे	सान्त्वयामहे
सान्त्वयसे	सान्त्वयेथे	सान्त्वयध्वे
सान्त्वयते	सान्त्वयेते	सान्त्वयन्ते

LANGUAGE-STUDY:—

१ कृषीवलः **मुहूर्तम्** कर्षणात् विरमति।

दिवसम् विश्राम्यति नृपस्य सचिवः।

In Sanskrit a word denoting a *period* of time is used in the Accusative case as can be seen from the sentences given above.

But, if an action is such that it can be accomplished or that it has been accomplished within that period, the Instrumental is to be used instead of the Accusative.

E. g. **क्षणेन** एव वयम् नदीम् प्राप्ताः।

PECULIAR CONSTRUCTIONS :—

१ कृषीवलः सूर्यस्य उदयात् प्राक् उत्तिष्ठति ।
२ बलीवर्दान् हले प्रयुज्य क्षेत्रम् कृषति ।
३ धान्यम् लोकानाम् रक्षणाय कल्पते ।
४ मुहूर्तम् कर्षणात् कृषीवलः विरमति ।

ADDITIONAL EXERCISES :—

अनर्घ्यम्[1] अपि माणिक्यम् स्वर्णाश्रयम्[2] अपेक्षते[3] ।
अनाश्रयाः[4] न शोभन्ते पण्डिताः, वनिताः[5], लताः ॥

सुखम् आपतितम्[6] सेव्यम्[7], दुःखम् आपतितम् तथा ।
चक्रवत्[8] परिवर्तन्ते दुःखानि च सुखानि च ॥

TRANSLATE :—

Man can not live without food. Rice is the staple food of the Indians. There are various kinds of rice. Rice is produced in the fields. Rain is absolutely necessary for rice. The farmer burns the fields (ready) for rice. On account of that he gets exceedingly tired. The farmer prays God for rain. By the grace of God the farmer obtains the fruit of his labour. The farmer takes the rice to the bazar. The farmer obtains money by selling the rice.

New words :—आहारः; भारतीयः; मुख्य; तण्डुलः; पुष्कल; प्रकारः; आवश्यक; दह्; ततः; श्रान्त; प्र+अर्थ्; कृपा; फलम्; आपणः; विक्रयं कृत्वा.

[1. Precious; 2. The support of gold; 3. To desire; 4. Without support; 5. Woman; 6. Befallen; 7. Must be enjoyed or endured; 8. Like a wheel.]

HOME–WORK :—

1 Use the following in your own sentences :—

नमः; प्राक्; अत्रान्तरे; कृते; वि + रम्; क्लृप्;

तु; विना; प्रभृति; नाम; नम्.

2 Conjugate fully the following roots :—

उत् + स्था and भज्.

3. Write a grammatical note on the following sentence :—

कुक्कुटाः सारमेयाः बलीवर्दाः च कृषीवलस्य धनम् ।

पञ्चमः पाठः

कथयामि मदीयं वृत्तान्तम् ।

बालाः, कथयामि युष्मभ्यं मदीयं वृत्तान्तम् । मां जनाः पुष्कलैः अभिधानैः आह्वयन्ति । तथापि गङ्गेति ममाभिधानं प्रसिद्धम् । अहं पर्वतानां नृपस्य हिमालयस्य कन्या । अभिजातं मे कुलम् । अहं मे जनकस्य प्रिया कन्या । तथापि कन्यैव । जनकस्य गृहे चिरं स्थातुं न शक्यम् । अतः एव शैशवं जनकस्य गृहे सुखेन नीत्वाधुना यौवनं प्राप्ता प्रियतमं सागरं प्रति गच्छामि । मम गमनस्य काले

१ तथा + अपि = तथापि; २ गङ्गा + इति = गङ्गेति; ३ मम + अभिधानं = ममाभिधानं; ४ कन्या + एव = कन्यैव; ५ नीत्वा + अधुना = नीत्वाधुना.

मम जनकः अतीव दुःखितः जातः। तथाप्येहं प्रस्थिता। प्रियतमस्य दर्शने उत्सुकाहमतीव वेगेन गच्छामि, प्रस्तरात् प्रस्तरं पतामि च। तथाप्यहं क्लेशं न गणयामि। एवं हिमालयस्य गृहं त्यक्त्वा समुद्रं गच्छामि। मम मार्गे काशी तिष्ठति। तत्र देवस्य विश्वनाथस्य प्रसिद्धं देवालयं वर्तते। तत्र देवस्य विश्वनाथस्याराधनाय क्षणमिव वेगं संहृत्य प्रशान्ता भवामि। एवं भुवनस्य देवमाराध्य, हृदयस्य देवमाराधयितुं पुनः प्रस्थिता, प्रियकरं समुद्रमासाद्यैव वेगं संहरामि।

VOCABULARY

अधुना (*Indecl.*) Now.
अभिजात (*Adj.*) Noble.
अभिधान (*n.*) Name.
अस्मद् (*Pron.*) I or we.
आराधयितुम् (*Inf.*) For the purpose of worshipping or courting.
आराध्य (*Ger.*) Having worshipped or courted.
आ + ह्वे [आह्वयति] To call; to invite.
कथ् [कथयति] To tell.
[Used with the Dative of a noun.]
गण् [गणयति] To count; to reckon; to care for.
नीत्वा (*Ger.*) Having carried or passed.
प्रस्तर (*m.*) A stone; a slab.
मदीय (*Adj.*) My; mine.
युष्मद् (*Pron.*) Thou or you.
शैशव (*n.*) Childhood.
सम् + हृ [संहरति] To collect; to check; to kill.
संहृत्य (*Ger.*) Having checked, collected, or killed.
स्था [तिष्ठति] To stand;
स्थातुम् (*Inf.*) For the purpose of standing or staying; in order to stand or stay.

---

६ तथा+अपि + अहम् = तथाप्यहम्; ७ उत्सुका + अहम् + अतीव = उत्सुकाहमतीव; ८ विश्वनाथस्य + आराधनाय = विश्वनाथस्याराधनाय; ९ क्षणम् + इव = क्षणमिव; १० देवम् + आराध्य = देवमाराध्य; ११ देवम् + आराधयितुम् = देवमाराधयितुम्; १२ समुद्रम् + आसाद्य + एव = समुद्रमासाद्यैव.

GRAMMAR:—

	अस्मद्				युष्मद्		
	Sing.	Du.	Pl.		Sing.	Du.	Pl.
N.	अहम्	आवाम्	वयम्	N.	त्वम्	युवाम्	यूयम्
Ac.	माम् मा	आवाम् नौ	अस्मान् नः	Ac.	त्वाम् त्वा	युवाम् वाम्	युष्मान् वः
I.	मया	आवाभ्याम्	अस्माभिः	I.	त्वया	युवाभ्याम्	युष्माभिः
D.	मह्यम् मे	आवाभ्याम् नौ	अस्मभ्यम् नः	D.	तुभ्यम् ते	युवाभ्याम् वाम्	युष्मभ्यम् वः
Ab.	मत्	आवाभ्याम्	अस्मत्	Ab.	त्वत्	युवाभ्याम्	युष्मत्
G.	मम मे	आवयोः नौ	अस्माकम् नः	G.	तव ते	युवयोः वाम्	युष्माकम् वः
L.	मयि	आवयोः	अस्मासु	L.	त्वयि	युवयोः	युष्मासु

SANDHI RULES :—

S. R. No. 2. Final म् followed by any consonant is changed to an *Anuswāra*. If it is followed by a vowel, it simply combines with that vowel.

E. g. वनम् गतः — वनं गतः।

अयोध्याम् आगतः — अयोध्यामागतः।

S. R. No. 3.

Final	Initial	Result
अ or आ	अ or आ	आ
इ or ई	इ or ई	ई
उ or ऊ	उ or ऊ	ऊ
ऋ or ॠ	ऋ or ॠ	ॠ

E. g. जनक + आत्मजा = जनकात्मजा; नदी + इह = नदीह; गुरु + उपदेशः = गुरूपदेशः; पितृ + ऋणम् = पितॄणम्; etc.

S. R. No. 4.

Final	Initial	Result
अ or आ	इ or ई	ए
अ or आ	उ or ऊ	ओ
अ or आ	ऋ or ॠ	अर् *
अ or आ	ए or ऐ	ऐ
अ or आ	ओ or औ	औ

E. g. रमा + ईशः = रमेशः; कुल + उत्पन्नः = कुलोत्पन्नः; तव + ऐश्वर्यम् = तवैश्वर्यम्; मम + औषधम् = ममौषधम्; etc.

* **Note** :—Initial ऋ preceded by अ, आ, इ, ई, उ, ऊ, ऋ or ॠ may not combine with the preceding vowel; when it does not combine with the preceding vowel, the preceding vowel if long is made short.

E. g. ब्रह्मा + ऋषि :— ब्रह्मर्षिः / ब्रह्मऋषिः }

सप्त + ऋषय :— सप्तर्षयः / सप्तऋषयः } etc.

S. R. No. 5.

Final	Initial	Result
इ or ई	Any vowel except इ or ई	य् + Initial vowel
उ or ऊ	Any vowel except उ or ऊ	व् + Initial vowel
ऋ or ॠ	Any vowel except ऋ or ॠ	र् + Initial vowel
ऌ	Any vowel except ऌ	ल् + Initial vowel

E. g. तथापि + अहम् = तथाप्यहम्; ननु + एतत् = नन्वेतत्; मातृ + आसनम् = मात्रासनम्; etc.

LANGUAGE-STUDY :—

Incorrect	Correct
मे अभिधानं गङ्गा।	अभिधानं मे गङ्गा।
वः कथयामि वृत्तान्तम्।	कथयामि वः वृत्तान्तम्।

The optional froms मा, मे, नौ, नः and त्वा, ते, वाम्, वः of अस्मद् and युष्मद् are never used at the beginning of a sentence.

१ कथयामि युष्मभ्यं मदीयं वृत्तान्तम्।
२ अधुना प्रियतमं सागरं प्रति गच्छामि।
३ प्रियतमस्य दर्शने उत्सुकाहमतीव वेगेन गच्छामि।

ADDITIONAL EXERCISES :—

वरमश्रीकता[1] लोके, नासमान-समानता[2]।
इतीव कुमुदोद्भेदे[3] कमलैः मुकुलायितम्[4] ॥

देशान् उत्सृज्य[5] गच्छन्ति सिंहाः, सत्पुरुषाः, गजाः।
तत्रैव निधनं यान्ति[6] काकाः, कापुरुषाः[7], मृगाः ॥

न देवः विद्यते[8] काष्ठे, न पाषाणे, न मृण्मये[9]।
भावेषु विद्यते देवः, तस्मात् भावः हि कारणम् ॥

TRANSLATE :—

I get up in the morning. Having finished my morning duties, I take my bath. After that I go to the temple to see (the idol of) God. Having returned, I eat something (eatables) and study my lessons. Then after taking my meal, I go to school. There I study various subjects. In the evening I return home from school. After that I play, take my supper, bow down to God, mother and father and go to bed.

New words :—उत् + स्था; दर्शनम्; देवालयम्; पठ्; पाठशाला; संध्याकालः; खेल्; विविध; विषयः.

[1 Poverty; 2 Equality with the inferiors; 3 Blooming of night lotuses; 4 Closed. 5 Having abandoned; 6 To go; 7 Wicked people; 8 To be; 9 Things made of clay.]

HOME-WORK :—

1. Join according to Sandhi Rules :—

शरीरम् + अलङ्कारैः; आसनम् + आनयति; अद्य + अहम् + आगच्छामि; तृणानि + अत्र + आनयति; इच्छया + एव; ननु + ईक्षते.

2. Complete the following sentences by filling in the blank spaces with the proper forms of the words given in brackets:—

१ ——— विना सीता न जीवति । (राम)

२ अहं ——— कृते यते । (युष्मद्)

३ रामः ——— कथां कथयति । (अस्मद्)

४ बालः ——— विरमति । (भक्षण)

५ रामः ——— वृक्षस्य छायायां तिष्ठति । (मुहूर्त)

षष्ठः पाठः

वसन्तस्यावतारः ।

(ततः प्रविशति जलयन्त्रस्य समीपे उपविष्टः मालाकारः)

मालाकारः—समाप्तं वृक्षाणां सेचनम् । किं कर्तव्यम् ? वसन्तः अपि नायातः, नानिलः, न मञ्जरी, न मधुकरिका, न कोकिला, न शोभा । तैः आगतैः मम सुतरां मोदः जायते । तेषामाराधनाय मया मधुराणि फलानि, रम्याणि कुसुमानि च सम्पादितानि । किमिति चिरायन्ते एते ? ह्यः अनिलः चिरेण मन्दं मन्दमागतः, किन्तु न वसन्तः, न मञ्जरी, न मधुकरिका, न कोकिला, न शोभा । किं कर्तव्यम् ? किञ्चित् विहरामि । (इति परिक्रामति ।) अये, अत्रैवैते पुष्करिण्याः जले खेलन्ति । एषः वसन्तः, एषः अनिलः । कैषा बालिका मधुरं गायति । भोः वसन्त, कैषा ते नव्या सखी ?

वसन्तः—भोः मालाकार, एषा मे प्रिया सखी मधुकरिका । परिचितैव ते ।

मालाकारः—हन्त ! परिचितैव मे। मधुकरिके, स्वागतं ते। चिरात् खलु दृष्टासि।

मधुकरिका—प्रियः मे मालाकारः। यत्र कुत्रापि गताहम्। अतः एव चिरात् आगता। अपि विस्मृताहम्?

मालाकारः—नहि नहि कथमेवं भवति। वृद्धः अस्मि वत्से, न सम्यक् अवलोकिता।

मधुकरिका—सुष्ठु शोभसे दाक्षिण्येन।

मालाकारः—अहो कुत्र गता मञ्जरी? नागता?

वसन्तः—आगतैव। सा वल्लरीषु पल्लवैः सह खेलति।

मधुकरिका—(स्वगतम्) कथं मञ्जरी वल्लरीषु खेलति? अहमपि तद् एव स्थानं गच्छामि। (इति निभृतं प्रचलति।)

मालाकारः—कथं रे अनिल, मग्नः असि क्रीडायाम्!

अनिलः—माम, क्रीडाशीलः एवाहम्। न हि शक्यं क्षणमपि क्रीडां विनावस्थातुम्।

मालाकारः—अतः एव मम मोदाय भवसि।

वसन्तः—माम, खिन्नः असि श्रमेण। कष्टमयं ते जीवितम्। वृक्षाणां लतानां च सेचनं, तेषां सङ्गोपनम्, आधाराणां बन्धनं, कीटानां निवारणं, तृणानामुत्पाटनम्, आलवालानां बन्धनं च नूनं कष्टमयम्। अपि ते रोचते तव कार्यम्?

मालाकारः—अथ किम्। एषा क्रिया कलेति शिक्षिताधुना मे जीविका संवृत्ता। मोदायोदरस्य भरणाय चैषा कल्पते। कुत्र गता मधुकरिका?

वसन्तः—अहो कुत्र गता मधुकरिका? अरे अनिल,...... कथमनिलः अपि नष्टः! (नेपथ्ये गानम्।)

वसन्तः—आं कोकिलैषा गायति। एषाप्यागता।

मालाकारः—कोकिले, स्वागतं ते। कुत्र वर्तते मधुकरिका?

कोकिला—सानिलेन सहिता मञ्जर्या सह लतासु क्रीडति।

वसन्तः—वयमपि तत्रैव गच्छामः। (परिक्रामन्ति।)

मालाकारः—कैषा मञ्जर्या मधुकरिकया च सह क्रीडति?

वसन्तः—अरे एषा शोभा परिचितैव ते।

मालाकारः—वृद्धः अस्मि वत्स, न सम्यक् अवलोकिता। युष्माभिः आगतैः अधुना सुतरां रम्यं सञ्जातमुद्यानम्। सम्पूर्णः मे मनोरथः। एषः वः फलानां पुष्पाणां चाञ्जलिः।

वसन्तः—अरे अस्मभ्यमखिलं प्रयच्छसि। तुभ्यं किम्? किं तव श्रमस्य फलम्?

मालाकारः—तवैवैतत् तुभ्यं दत्तम्। आनन्दः एव मम श्रमस्य फलम्।

वसन्तः—तुभ्यं किं यच्छामः?

मालाकारः—यद् वः प्रियम्।

वसन्तः—यथानन्दमेवेच्छसि, तमेव तुभ्यं यच्छामः।

(इति निष्क्रान्ताः।)

VOCABULARY.

अवलोकित (*pp. pass.*) Seen.

अवस्थातुम् (*Inf.*) In order to stay or stand.

आयात (*pp. pass.*) Arrived; come.

आलवाल (*n.*) A basin for water round the root of a tree.

उत्पाटन (*n.*) Rooting out; removing.

उपविष्ट (*pp. pass.*) seated.

चिर् [चिरायते] To delay; to be late.

चिरम् (*Indecl.*) For a long time.

चिरात् (*Indecl.*) After a long time.

जलयन्त्र (*n.*) A water wheel; a fountain.

जीविका (*f.*) Livelihood.

दा [यच्छति] To give.
[Used with the Dative of a noun.]

निभृतम् (*Indecl.*) Quietly.

निष्क्रान्त (*pp. pass.*) Gone.

नेपथ्ये (*Indecl.*) Behind the scenes.
पुष्करिणी (*f.*) An artificial pool or pond.
प्र + दा [प्रयच्छति] To give.
मधुकरिका (*f.*) The honec-bee.
मालाकार (*m.*) A gardener.
रुच् [रोचते] To please; to be liked.
[Used with the Dative of the person who likes.]
वत्स (*m.*) Child. (A term of endearment.)
वल्लरी (*f.*) A creeper.
सम्यक् (*Indecl.*) Well; properly.
सञ्जात, संवृत्त (*pp. pass.*) Happened; born; become.
सुतराम् (*Indecl.*) exceedingly.
सुष्ठु (*Indecl.*) Well.
सेचन (*n.*) Sprinkling.
हन्त (*Indecl.*) Ah ! Alas !
[This interjectional particle expresses joy, wonder, or sorrow.]
ह्यः (*Indecl.*) Yesterday.

GRAMMAR :—

Pronouns

किम् (Masculine)

	Sing.	Du.	Pl.
N.	कः	कौ	के
Ac.	कम्	कौ	कान्
I.	केन	काभ्याम्	कैः
D.	कस्मै	काभ्याम्	केभ्यः
Ab.	कस्मात्	काभ्याम्	केभ्यः
G.	कस्य	कयोः	केषाम्
L.	कस्मिन्	कयोः	केषु

किम् (Feminine)

	Sing.	Du.	Pl.
N.	का	के	काः
Ac.	काम्	के	काः
I.	कया	काभ्याम्	काभिः
D.	कस्यै	काभ्याम्	काभ्यः
Ab.	कस्याः	काभ्याम्	काभ्यः
G.	कस्याः	कयोः	कासाम्
L.	कस्याम्	कयोः	कासु

किम् (Neuter)

	Sing.	Du.	Pl.
N.	किम्	के	कानि
Ac.	किम्	के	कानि

The rest like the masculine.

एतद् (Masculine)

	Sing.	Du.	Pl.
N.	एषः	एतौ	एते
Ac.	एतम् एनम्	एतौ एनौ	एतान् एनान्
I.	एतेन एनेन	एताभ्याम्	एतैः
D.	एतस्मै	एताभ्याम्	एतेभ्यः
Ab.	एतस्मात्	एताभ्याम्	एतेभ्यः
G.	एतस्य	एतयोः एनयोः	एतेषाम्
L.	एतस्मिन्	एतयोः एनयोः	एतेषु

एतद् (Feminine)

	Sing.	Du.	Pl.
N.	एषा	एते	एताः
Ac.	एताम् एनाम्	एते एने	एताः एनाः
I.	एतया एनया	एताभ्याम्	एताभिः
D.	एतस्यै	एताभ्याम्	एताभ्यः
Ab.	एतस्याः	एताभ्याम्	एताभ्यः
G.	एतस्याः	एतयोः एनयोः	एतासाम्
L.	एतस्याम्	एतयोः एनयोः	एतासु

एतद् (Neuter)

	Sing.	Du.	Pl.
N.	एतत् एतद्	एते	एतानि
Ac.	एतत्-एनत् एतद्-एनद्	एते एने	एतानि एनानि
I.	एतेन एनेन	एताभ्याम्	एतैः

The rest like the masculine.

The pronouns 'यद्' and 'तद्' are declined like 'किम्' in all the three genders. The forms of 'यद्' are obtained by substituting 'य्' in place of 'क्' in the forms of 'किम्', and those of 'तद्' by substituting 'त्' in place of 'क्'. But, the Nominative and Accusative singulars neuter of 'यद्' and 'तद्' and the Nominative singulars masculine and feminine of 'तद्' are slightly different. They are :—

तद्

	Sing.	Du.	Pl.
Mas. N.	सः	तौ	ते
Fem. N.	सा	ते	ताः
Neu. N. / Ac.	तत् / तद्	ते	तानि

यद्

	Sing.	Du.	Pl.
Mas. N.	यः	यौ	ये
Fem. N.	या	ये	याः
Neu. N. / Ac.	यत् / यद्	ये	यानि

SANDHI RULES :—

S. R. No. 6.

Final	Initial	Result
ए	अ	ए + अ = ए
ओ	अ	ओ + अ = ओ

Note :—The initial अ that merges in ए or ओ in this *sandhi* is generally shown by the *avagraha* (ऽ) sign.

E. g. देवे + अस्ति = देवेस्ति or देवेऽस्ति
प्रभो + अस्मि = प्रभोस्मि or प्रभोऽस्मि; etc.

LANGUAGE-STUDY :—

१ अपि विस्मृताहम् ?
अपि ते रोचते तव कार्यम् ?

An ordinary declarative sentence is changed into an interogative sentence by placing 'अपि' in the beginning of the sentence.

PECULIAR CONSTRUCTIONS :—

१ अपि ते रोचते तव कार्यम् ?
२ मधुकरिके, स्वागतं ते ।

ADDITIONAL EXERCISES :—

ततः प्रविशति विषण्णः विदूषकः ।

(निःश्वस्य) भोः दृष्टम् । एतस्य मृगयायामनुरक्तस्य नृपस्य सख्येन निर्विण्णः[1] अस्मि । एषः मृगः, एषः वराहः, एषः शार्दूलः, इति मध्याह्नेऽपि ग्रीष्मेण विरलासु पादपानां च्छायास्वाहिण्डाम्यटव्याः[2] अटवीम् । कदापि मांसस्याहारं खादामि । तुरगस्यानुधावनात् गात्राणि[3] पीडितानि भवन्ति, तेन निशायामपि निकामं[4] शयितव्यं[5] नास्ति । ततः प्रभाते एव दास्याःपुत्राणां[6] लुब्धकानां[7] कोलाहलेन प्रबुद्धः भवामि । इदानीमेतेनापि[8] पीडा न निष्क्रामेति[9] । ततः गण्डस्योपरि[10] पिण्डकैः[11] संवृत्तः । ह्यः[12] किल वयमवहीनाः[13], तस्मात् तेनास्माकं प्रियवयस्येन, मृगस्यानुसरणात् आश्रमं प्रविष्टेन, तापसस्य कन्यका ममाधन्यतया दृष्टा । साम्प्रतं नगरं गन्तुमपि नेच्छति । अद्यापि सः तामेव चिन्तयति । कः उपायः ? एषः अधुना यवनीभिः परिवृतः[14] इतः एवागच्छति प्रियवयस्यः । अङ्गस्य भङ्गैः विकलैः[15] इव भूत्वात्र तिष्ठामि ।

[इति दण्डमवलम्ब्य स्थितः ।]

—शाकुन्तलम् (Adapted)

HOME-WORK :—

(A) Answer the following questions in Sanskrit :—

१ मालाकारः किमर्थं खिन्नः ?

२ मालाकारस्य मोदाय किं भवति ?

३ कुत्र गता मञ्जरी ? कुत्र च गतः अनिलः ?

४ मालाकारस्य का कला ? तस्याः किं जातम् ?

५ मालाकारस्य श्रमस्य किं फलम् ?

(B) Write a grammatical note on the following :—

मोदायोदरस्य पोषणाय चैषा कल्पते ।

---

1 Dejected; 2 Forest; 3 Limb; 4 Enough; 5 Sleep; 6 Bastard; 7 Hunter; 8 Now; 9 Disappear; 10 A boil; 11 A pimple; 12 Yesterday; 13 Absent-minded; 14 Surrounded; 15 Withered; worn out.

सप्तमः पाठः

श्यामलकः अर्धचन्द्रेण ।

आसीत् अत्र धरापीठे विकण्टकं नाम पुरम् । तत्रेश्वरः नाम धनाढ्यः वैश्यः वसति स्म । तस्य जामातृकाः अवन्तीपीठात् प्राघूर्णिकाः विकण्टकं पुरमागच्छन् । सः तान् दृष्ट्वातीवामोदत, गौरवेणासेवत च । तत्र ते प्रभूतं कालमवसन् । ततः ईश्वरः निजां भार्यामभाषत । "एते जामातृकाः निजानि गृहाण्यद्यापि न गच्छन्ति । अपमानात् विना न निवर्तन्ते" इति । तद् अद्य तेभ्यः पादान् प्रक्षालयितुं जलं न देयम् । ततः गर्गः जलस्यादानेन, सोमः अल्पस्यासनस्य दानेन, दत्तः कुभोजनात् निरगच्छत् । परं श्यामलकः न प्राचलत् । ततः सः श्वशुरेणार्धचन्द्रं दत्वा गृहात् बहिः निरस्तः ।

—पञ्चतन्त्रम् (Adapted)

VOCABULARY

अदान (*n.*) Not giving.
अर्धचन्द्र (*m.*) Seizing by the neck and expelling.
कुभोजन (*n.*) A bad meal.
दत्त्वा (*Ger.*) Having given.
देय (*pot. pass. p.*) To be given; that which should be given.
धनाढ्य (*Adj*) Rich.
धरापीठ (*n.*) The earth.
निरस्त (*pp. pass.*) Expelled; driven out.
निर् + गम् [निर्गच्छति] To go out.
नि + वृत् [निवर्तते] To return.
परम् (*Indecl.*) But.
प्रक्षालयितुम् (*Inf.*) For the purpose of washing; in order to wash.
प्र + चल् [प्रचलति] To start; to move.
प्रभूत (*Adj.*) Plenty; many; much.
प्राघूर्णिक (*m.*) A guest; a visitor.
बहिः (*Indecl.*) Outside.
[Used with the Ablative of a noun.]
वस् [वसति] To dwell.
वैश्य (*m.*) A merchant.
सेव् [सेवते] To serve; to wait upon.
स्म (*Indecl.*) An explative.
[When used with the forms of the present tense, it gives the sense of the past tense.]

GRAMMAR :—

IMPERFECT TENSE.

Parasmaipada Terminations.			Ātmanepada Terminations.		
अम्	व	म	इ	वहि	महि
स्	तम्	त	थास्	इथाम्	ध्वम्
त्	ताम्	अन्	त	इताम्	अन्त

Rules:—1. The augment 'अ' is prefixed to the root, if the root begins with a consonant. If it begins with a vowel 'आ' is prefixed instead of 'अ'.

2. This augment is added directly to the root. If a preposition is prefixed to the root, the augment will come between the preposition and the root.

3. When the augment 'आ' is added to the roots beginning with vowels, the result of the combination of this 'आ' with the initial vowel of the root is the *vridhi* substitute of the latter.

Párasmaipada

First conjugation

भू

अभवम्	अभवाव	अभवाम
अभवः	अभवतम्	अभवत
अभवत्	अभवताम्	अभवन्

Fourth conjugation

शुष्

अशुष्यम्	अशुष्याव	अशुष्याम
अशुष्यः	अशुष्यतम्	अशुष्यत
अशुष्यत्	अशुष्यताम्	अशुष्यन्

Sixth conjugation

कृष्

अकृषम्	अकृषाव	अकृषाम
अकृषः	अकृषतम्	अकृषत
अकृषत्	अकृषताम्	अकृषन्

Tenth conjugation

मार्ग्

अमार्गयम्	अमार्गयाव	अमार्गयाम
अमार्गयः	अमार्गयतम्	अमार्गयत
अमार्गयत्	अमार्गयताम्	अमार्गयन्

Ātmanepada

First conjugation

क्रम्

अक्रमे	अक्रमावहि	अक्रमामहि
अक्रमथाः	अक्रमेथाम्	अक्रमध्वम्
अक्रमत	अक्रमेताम्	अक्रमन्त

Fourth conjugation

जन् (जा)

अजाये	अजायावहि	अजायामहि
अजायथाः	अजायेथाम्	अजायध्वम्
अजायत	अजायेताम्	अजायन्त

Sixth conjugation

मृ (म्रिय्)

अम्रिये	अम्रियावहि	अम्रियामहि
अम्रियथाः	अम्रियेथाम्	अम्रियध्वम्
अम्रियत	अम्रियेताम्	अम्रियन्त

Tenth conjugation

सान्त्व्

असान्त्वये	असान्त्वयावहि	असान्त्वयामहि
असान्त्वयथाः	असान्त्वयेथाम्	असान्त्वयध्वम्
असान्त्वयत	असान्त्वयेताम्	असान्त्वयन्त

Parasmaipada			Ātmanepada		
A root with a prefix			A root with a prefix		
निर्+गम्			प्र+स्था		
निरगच्छम्	निरगच्छाव	निरगच्छाम	प्रातिष्ठे	प्रातिष्ठावहि	प्रातिष्ठामहि
निरगच्छः	निरगच्छतम्	निरगच्छत	प्रातिष्ठथाः	प्रातिष्ठेथाम्	प्रातिष्ठध्वम्
निरगच्छत्	निरगच्छताम्	निरगच्छन्	प्रातिष्ठत	प्रातिष्ठेताम्	प्रातिष्ठन्त
A root beginning with a vowel			A root beginning with a vowel		
इष् (इच्छ्)			ईक्ष्		
ऐच्छम्	ऐच्छाव	ऐच्छाम	ऐक्षे	ऐक्षावहि	ऐक्षामहि
ऐच्छः	ऐच्छतम्	ऐच्छत	ऐक्षथाः	ऐक्षेथाम्	ऐक्षध्वम्
ऐच्छत्	ऐच्छताम्	ऐच्छन्	ऐक्षत	ऐक्षेताम्	ऐक्षन्त

अस् (Irregular)

आसम्	आस्व	आस्म
आसीः	आस्तम्	आस्त
आसीत्	आस्ताम्	आसन्

LANGUAGE-STUDY :—

१ ततः गर्गः जलस्यादानेन, सोमः अल्पस्यासनस्य दानेन, दत्तः कुभोजनात् निरगच्छत् ।

वृक्षाणां सेचनं, आधाराणां बन्धनं, कीटानां निवारणं, तृणानामुत्पाटनं च नूनं कष्टमयमस्ति ।

If there are several Nominatives in different numbers and belonging to the same person and connected by '*and*' standing as subjects to a common predicate, the predicate agrees with their combined number and their common person.

If the Nominatives belong to different persons, the common predicate will agree with their combined number. As regards the person, it will agree with the *first person*, if any one of the Nominatives belongs to the first person, and with the *second person*, if the Nominatives belong only to the second and the third persons.

But, if the predicate is understood separately with each of these subjects, it is made to agree with the nearest subject in *number and person* as in the above sentences.

PECULIAR CONSTRUCTIONS :—

१ सः श्वशुरेण गृहात् बहिः निरस्तः ।

ADDITIONAL EXERCISES :—

नृपस्य मित्रम् ।

कस्यचित् भूपस्य नित्यं वानरः अङ्गसेवकः[1] अतिभक्तिपरः[2] अन्तःपुरेऽप्यप्रतिषिद्धः[3] आसीत् । सः च तस्य भूपस्यातिविश्वासस्य स्थानमभवत् । एकदा भूपालः निद्रामगच्छत् । सः वानरः तं वीजयितुं[4] व्यजनमानयत्[5] । तदा तेन वानरेण नृपस्य वक्षःस्थलस्योपरि[6] काचित् मक्षिकोपविष्टा[7][8] दृष्टा । व्यजनेन सा मुहुर्मुहुः[9] प्रतिषिद्धा, परं पुनः पुनः तत्रैव सा समुपाविशत्[10] । ततः तेन स्वभावात् चपलेन मूर्खेण क्रुद्धेन च वानरेण तीक्ष्णं खड्गमादाय[11] तस्याः उपरि प्रहारः विहितः[12] । ततः मक्षिकोड्डीय[13] गता । परं तेन प्रहारेण नृपस्य वक्षःस्थलं द्विधा[14] जातम् । नृपः ततः अम्रियत च । तस्मात् नृपेण मूर्खः अनुचरः[15] न रक्षणीयः[16] ।

—पञ्चतन्त्रम् (Adapted)

---

1 Attendant; 2 Devoted; 3 Not prohibited; 4 To fan; 5 A fan; 6 The chest; 7 A fly; 8 Seated; 9 Often; 10 To sit; 11 Having taken; 12 Gave; 13 Having fled; 14 In two parts; 15 Attendant; 16 Fit to be kept.

TRANSLATE:—

Many people say that the Āryans came to Āryāvarta. Formerly they lived in the polar regions. Long ago there was a (heavy) snowstorm there. On account of that they went hither and thither. At that time they went to different countries.

Their complexion was fair. Their noses were straight. Their bodies were well-built. They had* weapons and they were also well-acquainted with sciences. They worshipped many gods. The principal among those gods were Indra, Soma, Sūrya, and Varuṇa. Having come to Bhārtavarṣa, they composed the Vedas. In these Vedas there are various interesting hymns composed by them. (in praise) of these gods Sanskrit is the language of the Āryans.

New words:—आर्यः; वद्; ध्रुवप्रदेशः; वर्षावः; इतस्ततः; विविध; देशः; वर्णः; गौर; नासिका; सरल; असित; शरीरम्; भव्य; शस्त्रम्; शास्त्रम्; देवता; प्रमुख; बुध्; वेदाः; रच्; रचित; स्तवनम्; भाषा; संस्कृतम्.

HOME-WORK :—

(1) Describe the land of the Āryans in about ten lines.

(2) Conjugate fully in the Imperfect :—वस्, मुद् and सेव्.

(3) Translate the story "नृपस्य मित्रम्"

---

* There is no equivalent of the root 'to have' in Sanskrit. Therefore sentences in which the root 'to have' has been used must be translated into Sanskrit by using the forms of अस् (to be) with the Genitive of the subject of 'have.'

E. g. I have a book.— मम पुस्तक मस्ति ।

This book has a hundred leaves.—

एतस्य पुस्तकस्य शतं पत्राणि सन्ति ।

अष्टमः पाठः

प्रार्थना ।

रावणेन वित्रस्ताः सुराः इन्द्रं पुरस्कृत्य क्षीरसमुद्रमगच्छन् । तत्र त[1] ईश्वरं प्रार्थयन्त । यथा—

"हे देव, त्वमधुना निद्रां त्यज । उत्तिष्ठ । अस्मान् पश्य च । रावणः ब्रह्मदेवस्य वरात् दृप्तः । अस्मान् अतीव पीडयति । जनान् निषूदयति । धर्मं विध्वंसते । ललनाः अपहरति । हे देवाधिदेव, रक्षास्मान् । विलोकयस्व नः । त्वमस्माकं दयस्व । त्रायस्व नः एतस्मात् घोरात् व्यसनात् । एषः इन्द्रः, एषः वरुणः, एषः सोमः, एषः सूर्यः । एवमखिलाः अपि देवाः अत्रोपस्थिताः । सूर्यः दिवा प्रकाशितुमपि लज्जते । एषः पवनः मन्दं मन्दमेव वहति ।

"नारायण, मुञ्च शयनम् । अवबोध नः घोरं सङ्कटम् । आपृच्छस्व दयितां लक्ष्मीम् । त्वरस्व च शीघ्रं दैत्यानां नाशाय । त्वमेवास्माकं शरणम् ।

"त्रायस्व पुण्डरीकाक्ष भक्तानामभयङ्कर" इति ।

ततः प्रसन्नः नारायणः शयनं त्यक्त्वा देवेभ्यः दर्शनमयच्छत् । सः अभाषत—

"मा भीताः भवत । अहं शीघ्रमेव जीवलोकं गत्वा तं पापं निषूदयामि । यूयमपि तानि तानि वानराणां कुलानि पुत्ररूपेण भूषयध्वम्" । इत्युक्त्वा सः अन्तर्धानमगच्छत् । देवाः च विस्मिताः स्वर्गं प्रति न्यवर्तन्त ।

VOCABULARY

अन्तर्धान (*n.*) Disappearing.
अभयङ्कर (*Adj.*) Destroyer of fear.
अव + बुध् [अवबोधति] To know.
आ + प्रच्छ् [आपृच्छते] To take leave of.
उक्त्वा (*Ger.*) Having spoken.
उपस्थित (*pp. pass.*) Approached.

---

१ ते + ईश्वरं = त ईश्वरं.

त्रै [त्रायते] To protect; to save. [Used with the Ablative of a noun.]

त्वर् [त्वरते] To hurry up; to make haste.

दय् [दयते] To take pity or compassion. [Used with the Genitive of a noun.]

दयिता (*f.*) A beloved one.

दिवा (*Indecl.*) By day.

दृप्त (*pp. pass.*) Arrogant; puffed up with pride.

दृश् [पश्यति] To see.

नि + सूद् [निषूदयति] To kill.

पाप (*m.*) A wicked man.

पुरस्कृत्य (*Ger.*) Having placed in front.

मा (*Indecl.*) Not. [A prohibitive particle.]

मुच् (मुञ्चति) To give up; to release.

वह् (वहति) To Carry; to blow; to flow.

वित्रस्त (*pp. pass.*) Troubled; terrified.

वि + लोक् [विलोकयति–ते] To see.

GRAMMAR :—

IMPERATIVE MOOD.

Parsmaipada Terminations			Ātmanepada. Terminations.		
आनि	आव	आम	ऐ	आवहै	आमहै
०	तम्	त	स्व	इथाम्	ध्वम्
तु	ताम्	अन्तु	ताम्	इताम्	अन्ताम्
	भू			क्रम्	
भवानि	भवाव	भवाम	क्रमै	क्रमावहै	क्रमामहै
भव	भवतम्	भवत	क्रमस्व	क्रमेथाम्	क्रमध्वम्
भवतु	भवताम्	भवन्तु	क्रमताम्	क्रमेताम्	क्रमन्ताम्
	शुष्			जन् (जा)	
शुष्याणि	शुष्याव	शुष्याम	जायै	जायावहै	जायामहै
शुष्य	शुष्यतम्	शुष्यत	जायस्व	जायेथाम्	जायध्वम्
शुष्यतु	शुष्यताम्	शुष्यन्तु	जायताम्	जायेताम्	जायन्ताम्

कृप्

कृपाणि	कृपाव	कृपाम
कृप	कृपतम्	कृपत
कृपतु	कृपताम्	कृपन्तु

मार्ग्

मार्गयाणि	मार्गयाव	मार्गयाम
मार्गय	मार्गयतम्	मार्गयत
मार्गयतु	मार्गयताम्	मार्गयन्तु

मृ (म्रिय्)

म्रियै	म्रियावहै	म्रियामहै
म्रियस्व	म्रियेथाम्	म्रियध्वम्
म्रियताम्	म्रियेताम्	म्रियन्ताम्

सान्त्व्

सान्त्वयै	सान्त्वयावहै	सान्त्वयामहै
सान्त्वयस्व	सान्त्वयेथाम्	सान्त्वयध्वम्
सान्त्वयताम्	सान्त्वयेताम्	सान्त्वयन्ताम्

अस् (Irregular.)

असानि	असाव	असाम
एधि	स्तम्	स्त
अस्तु	स्ताम्	सन्तु

SANDHI RULES :—

S. R. No. 7.

Final	Initial	Result
ए	Any vowel except अ.	ए is changed to अ or अय्.
ओ	Any vowel except अ.	ओ is changed to अ or अव्.
ऐ	Any vowel.	ऐ is changed to आ or आय्.
औ	Any vowel.	औ is changed to आ or आव्.

Note:—The resulting अय्, आय्, अव्, and आव् combine with the initial vowel, while the अ and आ do not.

E. g.

ते	+ ईश्वरम्	= त	ईश्वरम्	or	तयीश्वरम् ।
प्रभो	+ आगच्छ	= प्रभ	आगच्छ	or	प्रभवागच्छ ।
ईक्षामहै	+ आचार्यम्	= ईक्षामहा	आचार्यम्	or	ईक्षामहायाचार्यम् ।
बालौ	+ ईक्षेताम्	= बाला	ईक्षेताम्	or	बालावीक्षेताम् ।

S. R. No. 8.

ई, ऊ and ए standing at the end of *dual* forms do not combine with the following initial vowel.

So also the final ए and ओ of interjectional particles do not combine with the following vowel.

E. g. कवी अधिगच्छतः । तरू अवनमतः । बालिके एते । अरे इन्द्र । अहो आश्चर्यम् ।

PECULIAR CONSTRUCTIONS :—

१ त्वमस्माकं दयस्व ।

२ त्रायस्व नः एतस्मात् घोरात् व्यसनात् ।

३ आपृच्छस्व दयितां लक्ष्मीम् ।

४ मा भीताः भवत ।

ADDITIONAL EXERCISES:—

महाश्वेतायाः विलापः ।

हा नाथ ! क्व[1] मामेकाकिनी[2]मशरणां[3] विमुच्य यासि[4]? पृच्छ तरलिकां[5] तव कृते मया यानुभूतावस्था । प्रसीद । सकृत्[6] अप्यालप । ईषत्[7] अपि विलोकय । पूरय मे मनोरथम् । आर्तास्मि । भक्तास्मि । अनुरक्तास्मि । अनाथास्मि । बालास्मि । अगतिकास्मि । दुःखितास्मि । अनन्यशरणास्मि[8] । किमिति न करोषि[9] दयाम् ? कथय किमपराद्धं[10], किं वा नानुष्ठितं[11] मया, कस्यां वा नाज्ञायामादृतं[12], येन कुपितः

---

1 Where; 2 Alone; 3 Helpless; 4 To go; 5 The name of Mahāśvetā's friend; 6 Once; 7 A little; 8 Having no other person to support; 9 To do; (to take compassion); 10 Committed (a fault); 11 Done; 12 Respected.

असि ? दासजनमकारणात् परित्यज्य व्रजसि। न भीतः असि कौलीनात् ? आः ! अहमद्यापि जीवामि। हा ! हतास्मि। धिक् मां दुष्कृतकारिणीं, यस्याः कृते तवेदृशी दशा वर्तते। नास्ति मत्सदृशी नृशंसहृदया, याहमेवंविधं त्वामुत्सृज्य गृहं गता। किं मे गृहेण, किमम्बया, किं तातेन, किं परिजनेन वा ? हा ! कमुपयामि शरणम् ? भगवत्यः वनदेवताः प्रसीदत, प्रयच्छतैतस्य प्राणान्।

—कादम्बरी (Adapted)

TRANSLATE :—

Being infatuated with the beauty of Sītā, Rāvaṇa said to her, " O beautiful lady, I love you. Let the fear arising from me be destroyed. Obtain from me various kinds of garments and beautiful ornaments. O Maithilī, give up this foolishness of yours. I will conquer the whole world and give it to Janaka for your sake. Eat, drink and enjoy at your sweet will. Give away this land and wealth as you please. What is the use of Rāma, a dweller in the forest, to you ? "

Having heard this Sītā simply censured his shameless behaviour. Then Rāvaṇa said to the female demons, " Try to create love for me in the heart of Sītā "; and (so saying) he went away.

They advised her accordingly. Do you want to know the reply given to them by her ? Then read the next lesson.

New words :—मोहित; सुन्दरी; कम्; समुत्थित; नश्; वस्त्रम्; दिव्य; अलङ्कारः; लभ्; मोहः; विजित्य; यथाकामम्; पा; रम्; वनचरः; किं प्रयोजनम्; आचरणम्; निन्द्; उत्पादयितुम्; प्रेमभावना; प्रत्युत्तरम्; उत्तर.

HOME-WORK :—

1. Conjugate fully in the Imperative Mood :—

   नि+वृत् and भाष्.

2. Recognise the following forms :—

   पुरस्कृत्य; प्रार्थयन्त; त्वम्; दस्रः; वाम्; ललनाः; नः; आपृच्छस्व.

3. Address a short prayer to Saraswatī in your own words in Sanskrit.

---

13 To go; 14 Scandle; censure; 15 Sinful; 16 Hard-hearted.

नवमः पाठः

सीतायाः राक्षसीभ्यः प्रत्युत्तरम् ।

न हि मे जीवितैः अर्थः, नैवार्थैः, न च भूषणैः ।
रुद्धायाः राक्षसीमध्ये विना रामं महारथम् ॥ १ ॥
धिक् मामनार्यामसतीं याहं तेन विनाकृता ।
मुहूर्तमपि रक्षामि जीवितं पापजीविता ॥ २ ॥
का च मे जीविते श्रद्धा, सुखे वा, तं प्रियं विना ।
न चाप्यहं चिरं दुःखं सहेय प्रियवर्जिता ॥ ३ ॥
चरणेनापि सव्येन न स्पृशेयं निशाचरम् ।
रावणं किं पुनर् अहं कामयेय विगर्हितम् ॥ ४ ॥
छिन्ना, भिन्ना, विभक्ता, वा क्षिप्ता दीप्तेऽनलेऽथवा ।
रावणं नोपतिष्ठेय, किं प्रलापेन वः चिरम् ॥ ५ ॥
यदि मामवगच्छेत् तु सः रुद्धामिह राघवः ।
अचिरेण तु लङ्कैषा श्मशानसदृशी भवेत् ॥ ६ ॥
यदि कश्चित् प्रयच्छेत् मे विषमद्य सुखं भवेत् ।
क्षिप्रं वैवस्वतं देवं पश्येयं बहु दुःखिता ॥ ७ ॥

—रामायणम् (Adapted)

VOCABULARY

अनल (*m.*) The fire.
अर्थ (*m.*) Use; wealth; meaning.
अव + गम् [अवगच्छति] To understand.
असती (*f.*) A bad or wicked woman.
उप + स्था [उपतिष्ठते] To wait upon; to worship.
कम् [कामयते] To love; to desire.
कश्चित् (*m.*) Some one.
किं पुनर् (*Indecl.*) Much less; much more.
क्षिप्त (*pp. pass.*) Thrown.
क्षिप्रम् (*Indecl.*) Soon; quickly.
धिक् (*Indecl.*) Fie upon! Cursed be! [Used with the Accusative of a noun.]
निशाचर (*m.*) A demon.
पापजीविता (*f.*) A sinful woman.
प्रलाप (*m.*) Idle or meaningless talk.

प्रियवर्जिता (*f.*) Separated from the beloved.
रुद्ध (*pp. pass.*) Obstructed; confined; besieged.
विगर्हित (*pp. pass.*) Censured; contemptible.
विनाकृत (*pp. pass.*) Separated. [Used with the Instrumental of a noun.]
विभक्त (*pp. pass.*) Divided into pieces.
वैवस्वत (*m.*) The god of death.
श्रद्धा (*f.*) Love; devotion; confidence. [Used with the Locative of a noun.]
सव्य (*Adj.*) Left.
सह् [सहते] To bear; to suffer; to endure; to tolerate.
स्पृश् [स्पृशति] To touch.

GRAMMAR:—

POTENTIAL MOOD

Parasmaipada Terminations			Ātmanepada Terminations		
ईयम्	ईव	ईम	ईय	ईवहि	ईमहि
ईः	ईतम्	ईत	ईथाः	ईयाथाम्	ईध्वम्
ईत्	ईताम्	ईयुः	ईत	ईयाताम्	ईरन्
	भू			क्रम्	
भवेयम्	भवेव	भवेम	क्रमेय	क्रमेवहि	क्रमेमहि
भवेः	भवेतम्	भवेत	क्रमेथाः	क्रमेयाथाम्	क्रमेध्वम्
भवेत्	भवेताम्	भवेयुः	क्रमेत	क्रमेयाताम्	क्रमेरन्
	शुष्			जन् (जा)	
शुष्येयम्	शुष्येव	शुष्येम	जायेय	जायेवहि	जायेमहि
शुष्येः	शुष्येतम्	शुष्येत	जायेथाः	जायेयाथाम्	जायेध्वम्
शुष्येत्	शुष्येताम्	शुष्येयुः	जायेत	जायेयाताम्	जायेरन्
	कृप्			मृ (म्रिय्)	
कृपेयम्	कृपेव	कृपेम	म्रियेय	म्रियेवहि	म्रियेमहि
कृपेः	कृपेतम्	कृपेत	म्रियेथाः	म्रियेयाथाम्	म्रियेध्वम्
कृपेत्	कृपेताम्	कृपेयुः	म्रियेत	म्रियेयाताम्	म्रियेरन्
	मार्ग्			सान्त्व्	
मार्गयेयम्	मार्गयेव	मार्गयेम	सान्त्वयेय	सान्त्वयेवहि	सान्त्वयेमहि
मार्गयेः	मार्गयेतम्	मार्गयेत	सान्त्वयेथाः	सान्त्वयेयाथाम्	सान्त्वयेध्वम्
मार्गयेत्	मार्गयेताम्	मार्गयेयुः	सान्त्वयेत	सान्त्वयेयाताम्	सान्त्वयेरन्

अस् (Irregular)

स्याम्	स्याव	स्याम
स्याः	स्यातम्	स्यात
स्यात्	स्याताम्	स्युः

LANGUAGE-STUDY:—

१ चरणेनापि सव्येन न स्पृशेयं निशाचरम्।
रावणं किं पुनर् अहं कामयेय विगर्हितम् ॥

Study carefully the meaning of the phrase "किं पुनर्" in the above verse. The phrase means "*much less; much more.*"

The translation of the verse would be :—

I can not even touch the demon with my left foot; *much less* shall I be able to love him.

PECULIAR CONSTRUCTIONS:—

१ धिक् मामनार्याम्!
२ तेन विनाकृता, जीवितं रक्षामि।
३ का च मे जीविते श्रद्धा?
४ किं प्रलापेन वः चिरम्?

ADDITIONAL EXERCISES:—

लालयेत्[1] पञ्च वर्षाणि, दश वर्षाणि ताडयेत्।
प्राप्ते तु षोडशे वर्षे पुत्रे मित्रवत्[2] आचरेत् ॥
रूप-यौवन-सम्पन्नाः, विशाल-कुल-सम्भवाः[3]।
विद्याहीनाः न शोभन्ते निर्गन्धाः इव किंशुकाः[4] ॥
यावत् जीवेत् सुखं[5] जीवेत्, ऋणं कृत्वा घृतं[6] पिबेत्।
भस्मीभूतस्य[7] देहस्य पुनः आगमनं कुतः ॥

---

1 To fondle; 2 Like a friend; 3 Birth; 4 A kind of flower; 5 Happily; 6 Ghee; 7 Burnt to ashes.

TRANSLATE :—

Nala was the king of the country of Niṣadhas. He heard the praise of the good qualities and the beauty of Damayantī, the daughter of the king of the country of Vidarbhas; and he started for her Swayaṃvara.

On the road he met Indra, Varuṇa, Yama and Anala. Nala went to Damayantī as their messenger. He said to her, "O Damayantī, I have come from the gods. You should not give up the gods. You should marry the gods. Do not wish for Nala. Are not the gods superior to men? What qualities of Nala have you seen? The beauty of men is perishable. Wealth is fickle. Do not be proud of his learning. Do not be infatuated with his strength. You are clever. Therefore you should do what is proper". So saying and having done the work of the gods, Nala returned.

After that he went to the hall of Swayaṃvara. There Damayantī chose Nala in the presence of the gods.

New words :— निषधदेशः; विदर्भदेशः; श्रुत; स्वयंवरः; प्र + स्था; अनलः; दूतः; भाष्; त्यज्; परि + नी; इष्; अधिक; योग्य; नश्वर; चञ्चल; अभिमानं वह्; बलम्; मुह्; चतुर; उक्त्वा; मण्डपः; समक्षम्; वृत.

HOME-WORK :—

1. Give in your own words in Sanskrit the reply of Sītā.
2. Conjugate fully in the Potential Mood :—

   सह्, उप+स्था and पत्.

3. Use the following in your own sentences :—

   विनाकृत, किं पुनर् and क्षिप्.

4. Answer the following questions in Sanskrit :—

   (अ) किमर्थं सीतायाः जीवितेः न प्रयोजनम्?

   (आ) अपि सीतानार्या? किमर्थं सैवं वदति?

   (इ) कः तस्याः निश्चयः?

दशमः पाठः

प्राणदानेन प्राणरक्षणम् ।

शिबिः नाम नृपतिः कस्य मोदाय न भवति? तेन निजानां प्राणानां विनिमयेनापि शरणमागतस्य प्राणान् रक्षितुं प्रयत्नः कृतः।

एकदा देवानां नृपः वज्रपाणिः इन्द्रः अग्निश्च शिबेस्सत्त्वं परीक्षितुं तस्य राजधानीमागच्छेताम्। इन्द्रश्श्येनस्य रूपमधारयत् वह्निश्च कपोतस्य। स श्येनस्तं कपोतमन्वसरत्। स वित्रस्तश्शिबेस्समीप आगत्य तस्याङ्क उपाविशत्। अभाषत च तम्। यथा—

"साधवः प्राणानां विनिमयेनापि रक्ष्याणां जीवितं रक्षन्ति। अहं श्येनात् भीतः। मामेष भक्षयति यदि त्वं मुञ्चसि" इति।

अत्रान्तरे स श्येनः अपि तत्रागत्य व्याहरत्—

"भो नृपते, जीवः जीवस्य जीवनम्। एतद् मम भक्ष्यम्। एतेनाहमसून् धारयामि। अलमश्रूणां निपातेन। कृतमतिशोकेन। मा सन्तप। एतस्य विहगस्य मांसस्य भारेण समं तव शरीरस्य मांसं विकृत्य मह्यं प्रयच्छ। तेनाहं तुष्यामि। अन्यथा नास्त्युपायः" इति।

ततस्तथेति स भूपतिः अवदत्। अनन्तरं स यथा यथा स्वमांसं स्वहस्तेनोत्कृत्य तुलायां तोलयति, तथा तथा स कपोतः अधः एव तिष्ठति। शीर्षात् परं न किमप्यवशिष्टम्। ततस्तस्यौदार्येण सन्तुष्टः इन्द्रस्तस्मै वरं प्रायच्छत्। तस्य प्रसादेन शिबेश्शरीरं पूर्ववत् अभवत्। ततस्तौ देवौ स्वर्गं प्रति प्रातिष्ठेताम्।

एतत् शुचि चरितं यः ध्यायेत् तस्य काचन पीडा न भवेत् इति पुराणेषु प्रसिद्धम्।

---

१ अग्निः + च = अग्निश्च; २ शिबेः + सत्वम् = शिबेस्सत्वम्; ३ इन्द्रः + श्येनस्य = इन्द्रश्श्येनस्य; ४ वह्निः + च = वह्निश्च; ५ सः + श्येनः + तं = स श्येनस्तं; ६ सः + वित्रस्तः + शिबेः + समीपे + आगत्य = स वित्रस्तश्शिबेस्समीप आगत्य; ७ एषः + भक्षयति = एष भक्षयति; ८ सः + श्येनः = स श्येनः; ९ ततः + तथा + इति = ततस्तथेति; १० ततः + तस्य + औदार्येण = ततस्तस्यौदार्येण; ११ इन्द्रः + तस्मै = इन्द्रस्तस्मै; १२ शिबेः + शरीरम् = शिबेश्शरीरम्; १३ ततः + तौ = ततस्तौ.

VOCABULARY

अङ्क (*m.*) Lap.

अधः (*Indecl.*) Below. [Used with the Genitive of a noun.]

अनु+सृ [अनुसरति] To follow; to chase.

अलम् (*Indecl.*) Enough of. [Used with the Instrumental of a noun.]

अवशिष्ट (*pp. pass.*) Remaining; left behind.

असु (*m.*) Life. [Always used in the plural.]

कपोत (*m.*) A pigeon.

कृतम् (*Indecl.*) Enough of. [Used with the Instrumental of a noun.]

तुष् [तुष्यति] To be pleased.

निपात (*m.*) Dropping.

परीक्षितुम् (*Inf.*) For the purpose of testing.

प्र+स्था [प्रतिष्ठते] To start.

पूर्ववत् (*Indecl.*) As before.

भाष् [भाषते] To speak.

मोद (*m.*) Joy.

रक्ष्य (*pot. pass. p.*) Fit to be protected.

वज्रपाणि (*m.*) An epithet of Indra.

वि+आ+हृ [व्याहरति] To speak.

विकृत्य (*Ger.*) Having cut or carved.

विनिमय (*m.*) Exchange.

शुचि (*Adj.*) Pure.

श्येन (*m.*) A hawk.

सम्+तप् [सन्तपति] To grieve; to be heated.

समम् (*Indecl.*) Equal to. [Used with the Instrumental of a noun.]

GRAMMAR:—

7. 'शिवि', Masculine noun ending in 'इ'.

	Sing.	Du.	Pl.
N.	शिविः	शिवी	शिवयः
Ac.	शिविम्	शिवी	शिवीन्
I.	शिविना	शिविभ्याम्	शिविभिः
D.	शिवये	शिविभ्याम्	शिविभ्यः
Ab.	शिवेः	शिविभ्याम्	शिविभ्यः
G.	शिवेः	शिव्योः	शिवीनाम्
L.	शिवौ	शिव्योः	शिविषु
V.	शिवे	शिवी	शिवयः

Masculine nouns ending in 'इ' such as वज्रपाणि, अग्नि, etc. are similarly declined.

'साधु', Masculine noun ending in 'उ'.

	Sing.	Du.	Pl.
N.	साधुः	साधू	साधवः
Ac.	साधुम्	साधू	साधून्
I.	साधुना	साधुभ्याम्	साधुभिः
D.	साधवे	साधुभ्याम्	साधुभ्यः
Ab.	साधोः	साधुभ्याम्	साधुभ्यः
G.	साधोः	साध्वोः	साधूनाम्
L.	साधौ	साध्वोः	साधुषु
V.	साधो	साधू	साधवः

Masculine nouns ending in 'उ' such as असु, गुरु, etc. are similarly declined.

9 'वारि', Neuter noun ending in 'इ'.

	Sing.	Du.	Pl.
N.	वारि	वारिणी	वारीणि
Ac.	वारि	वारिणी	वारीणि
I.	वारिणा	वारिभ्याम्	वारिभिः
D.	वारिणे	वारिभ्याम्	वारिभ्यः
Ab.	वारिणः	वारिभ्याम्	वारिभ्यः
G.	वारिणः	वारिणोः	वारीणाम्
L.	वारिणि	वारिणोः	वारिषु
V.	वारि / वारे	वारिणी	वारीणि

Declinable words ending in 'इ' such as शुचि, सुरभि, etc. are similarly declined in the Neuter.

'अश्रु', Neuter noun ending in 'उ'.

	Sing.	Du.	Pl.
N.	अश्रु	अश्रुणी	अश्रूणि
Ac.	अश्रु	अश्रुणी	अश्रूणि
I.	अश्रुणा	अश्रुभ्याम्	अश्रुभिः
D.	अश्रुणे	अश्रुभ्याम्	अश्रुभ्यः
Ab.	अश्रुणः	अश्रुभ्याम्	अश्रुभ्यः
G.	अश्रुणः	अश्रुणोः	अश्रूणाम्
L.	अश्रुणि	अश्रुणोः	अश्रुषु
V.	अश्रु / अश्रो	अश्रुणी	अश्रूणि

Neuter nouns ending in 'उ' such as वसु, तालु, etc. are similarly declined.

SANDHI RULES:—

S. R. N0. 9.

Preceded by	Final	Followed by	Result.
Any vowel	**Visarga**	क्, ख्, प् or फ्	The *visarga* remains unchanged.
,,	,,	च् or छ्	The *visarga* is changed to श्
,,	,,	ट् or ठ्	The *visarga* is changed to ष्
,,	,,	त् or थ्	The *visarga* is changed to स्
,,	,,	श्	The *visarga* remains unchanged or the *visarga* is changed to श्
,,	,,	ष्	The *visarga* remains unchanged or the *visarga* is changed to ष्
,,	,,	स्	The *visarga* remains unchanged or the *visarga* is changed to स्

E. g. प्रयत्नः कृतः = प्रयत्नः कृतः ।
साधवः प्राणान् = साधवः प्राणान् ।
अग्निः च = अग्निश्च ।
रामः टीकते = रामष्टीकते ।
ततः तव = ततस्तव ।
शिवेः शरीरम् = शिवेः शरीरम् or शिवेश्शरीरम् ।
पाठः षोडशः = पाठः षोडशः or पाठष्षोडशः ।
शिवेः सत्त्वम् = शिवेः सत्त्वम् or शिवेस्सत्त्वम् ।

S. R. No. 10.

The *visarga* of सः and एषः is dropped before all vowels and consonants except अ.

If सः and एषः are followed by अ, this following अ, the *visarga* and the preceding अ are together changed to ओ. The following अ (which has changed to ओ together with the *visarga* and the preceding अ) may be shown by the *avagraha* (ऽ) sign.

The *visarga* of the Vocative particle भोः is dropped before all vowels and soft consonants, but remains unchanged before hard consonants.

E. g. एषः भक्षयति — एष भक्षयति ।
सः कपोतः — स कपोतः ।
सः वित्रस्तः — स वित्रस्तः ।
सः अहम् — सोहम् or सोऽहम् ।
भोः नृपते — भो नृपते ।

LANGUAGE-STUDY :—

१ शीर्षात् परं न किमप्यवशिष्टम् ।

२ तस्य काचन पीडा न भवेत् ।

चित्, चन, or अपि are added to the forms of किम् in all its cases and genders to get the sense of Indefinite pronouns. Thus कश्चन, कश्चित् or कापि mean 'some one', 'any one'; केनापि, केनचित् or कयाचन mean 'by some one', 'by any one'; किमपि, किञ्चन, or किञ्चित् mean 'some thing', 'any thing', 'a little', and so on.

PECULIAR CONSTRUCTIONS :—

१ तेन निजानां **प्राणानां** परित्यागेन शरणमागतस्य **प्राणान्** रक्षितुं प्रयत्नः कृतः ।
२ अहं श्येनात् **भीतः** ।
३ एतेनाहमसून् धारयामि ।
४ अलमश्रूणां निपातेन ।
५ कृतमतिशोकेन ।
६ एतस्य विहगस्य भारेण **समं** तव शरीरस्य मांसं मह्यं प्रयच्छ ।
७ देवौ स्वर्गं प्रति **प्रातिष्ठेताम्** ।
८ **यथा यथा** स्वमांसं स्वहस्तेनोत्कृत्य तुलायां तोलयति, **तथा तथा** स कपोतः अधः एव तिष्ठति ।

ADDITIONAL EXERCISES :—

तृणात् अपि लघुस्तूलः, तूलात् अपि च याचकः ।
वायुना किं न नीतः स मामेवं प्रार्थयेत् इति ॥
शैले शैले न माणिक्यं, मौक्तिकं न गजे गजे ।
साधवः न हि सर्वत्र, चन्दनं न वने वने ॥
अतिदानात् बलिः बद्धः, अतिमानात् सुयोधनः ।
विनष्टः रावणः लौल्यात्, अति सर्वत्र वर्जयेत् ॥

TRANSLATE :—

Hiraṇyakaśipu and Hiraṇyākṣa were brothers. Viṣṇu, having taken the form of a boar killed Hiraṇyākṣa. Therefore his brother became very angry* with Viṣṇu. He practised austere penance and begged this boon of Bramhadeva :—" Let no one of the men created by you be able to kill me." Bramhadeva

---

[1 Cotton; 2 A mountain; 3 Tied up; 4 Passion; 5 To give up.]

* Use कुप्, to be angry. This root and others denoting 'anger', 'hatred', etc. govern the Dative of the person towards whom the feeling of anger is directed.

gave him that boon. He became very arrogant on account of that boon and began to trouble the whole world.

Kayādhū was his wife. She had† a son by name Pralhāda. He was a great devotee of Viṣṇu. He (Hiraṇyakaśipu) began to trouble him too. Then Viṣṇu became irritated and assuming the form of Narasiṃha slew him with his claws in the evening sitting on the threshold.

New words :—बन्धुः; वराहः; धारयित्वा; कुप्; उग्र; तपश्चर्या; याच्; निर्मित; हन्तुम्; समर्थ; आ+रभ्; परम; भक्तः; प्रक्षुभ्य; नरसिंहः; नखम्; देहली; उपविश्य.

HOME-WORK :—

1. Write the story of Śibi in the form of a conversation.
2. Translate the verses given as Additional Exercises.
3. Decline fully :—**वह्नि, वायु** and **शुचि.**

---

† See foot-note on page 39.

एकादशः पाठः

मन्त्रसिद्धिः ।

(ततः प्रविशति व्याकुलो विदूषकः)

विदूषकः—(स्वगतम्) अस्माकं प्रियो वयस्यो महावीरः सदैव मद्ये वनितानां सङ्गे च दुर्मित्रैस्सह रमते । देवी कीर्तिर्भृशं दुःखिता ।

देवी सुमतिः परं विषादमुपगता । देव्यपि नीतिर्दूरं निरस्ता । ता मासेनापि न पश्यति । ताभ्यः सदैव क्रुद्धः । तासां सङ्गे न कथमपि तुष्टिं

१ व्याकुलः + विदूषकः = व्याकुलो विदूषकः ; २ प्रियः + वयस्यः = प्रियो वयस्यः; ३ वयस्यः + महावीरः = वयस्यो महावीरः; ४ कीर्तिः + भृशं = कीर्तिर्भृशं; ५ नीतिः + दूरं = नीतिर्दूरं; ६ ताः + मासेन = ता मासेन.

लभते । गणिकां एव वयस्यस्य प्रीतेः पात्रम् । किन्तु महिष्यो दूरं निरस्ताः । देव्या सुमत्याह्वयाहमुक्तः "माणवक, पण्डितोऽसि । तथा यतस्व यथार्यपुत्रोऽस्मासु पूर्ववत् स्निह्येत्" इति । मयाप्युक्तम् । "बहु दुष्करमेतत् । बहुना धनेन साध्यम् । प्रियाराधनं नाम व्रतं कार्यम्" इति । सापि धनस्य राशिमेव मह्यमयच्छत् । मयापि व्रतमारब्धमेव । तथापि किं व्रतेन ? किं बोधेन ? भवतु । वयस्यं द्रष्टुं यते । आः ! एषात्र प्रतीहारी मदालसा गच्छति । पृच्छामि 'कुत्र वयस्यः' इति । (आकाशे) मदालसे, कुत्र वयस्यः ? (आकर्ण्य) किं भणसि ? गत्वा पश्येति ? कथमेवमुन्मत्तासि ? मम वार्द्धक्यमपि दृष्ट्वा न लज्जस एवं वक्तुम् ? (कर्णं दत्वा) किं भणसि ? देवस्य पुरतस्तवाविनयं कथयामीति ? कथं ममाविनयः ? (पुनः कर्णं दत्वा) किं भणसि ? अरे, एषा गालिं यच्छति । हन्त, का गतिः ! अथवा किमत्र चित्रम् ? अपवृत्ते नृपे, परिजनः प्रमत्तो भवत्येव ! भवतु गच्छामि । कोऽयमित एवागच्छति ? अमात्यः सुमन्त्र इति मन्ये । तिष्ठामि तावत् ।

सुमन्त्रः—(प्रविश्य) भो माणवक, किमेवं विषण्णस्तिष्ठसि ?

विदूषकः—कथमन्यथा भवामि ? अखिला देव्यो विषण्णाः कथमपि धृतिं न लभन्ते । वयस्यस्य प्रवृत्तिमपि न लभे । तथापि मया तासां कृते प्रियाराधनं नाम व्रतं ह्यो रात्रावारब्धम् । पश्यामः किं भवतीति ।

सुमन्त्रः—अधुना नास्ति तव व्रतेन तासां किमपि प्रयोजनम् ।

---

७ गणिकाः + एव = गणिका एव; ८ महिष्यः + दूरं = महिष्यो दूरं; ९ पण्डितः + असि = पण्डितोऽसि; १० आर्यपुत्रः + अस्मासु = आर्यपुत्रोऽस्मासु; ११ कः + अयम् = कोऽयम्; १२ कोऽयम् + इतः + एव = कोऽयमित एव; १३ सुमन्त्रः + इति = सुमन्त्र इति; १४ अखिलाः + देव्यः + विषण्णाः = अखिला देव्यो विषण्णाः; १५ ह्यः + रात्रावारब्धम् = ह्यो रात्रावारब्धम्.

विदूषकः—कथम् ?

सुमन्त्रः—अरे, तेन दुर्मित्रेणाविवेकेन दुर्गतिं नीतो देवः। तथापि नाववोधति। स दुष्ट[16] एव तस्य विश्वासस्य स्थानम्। देवेषु ब्राह्मणेषु च तस्य भक्तिर्नष्टा[17]। तद्—(इत्यर्धोक्ते)

विदूषकः—आः सत्यम्! मयि महाब्राह्मणेऽपि नास्ति तस्य भक्तिः।

सुमन्त्रः—तद् इक्षास्माभिश्चिन्तित[18] उपायः। तथास्माभिः कृतं यथैष दुष्टोऽविवेको महिषीः[19] कामयेत। सोऽपि कीर्तिं सुमतिं नीतिं चापाहरत्। एतया दुष्टया कृत्या क्रुद्धेन देवेन स हतो देव्यश्च रक्षिताः। एवं फलितोऽस्माकं[20] मन्त्रः। अधुना किं तव व्रतेन ?

विदूषकः—भो अमात्य, न युष्माकं मन्त्रः फलितः, किन्त्वस्माकं महाब्राह्मणानां मन्त्राः फलिताः। इदं व्रतस्य फलम्। अधुना प्रभूतां दक्षिणां लभे। गच्छामि तावत्।

सुमन्त्रः—अरे तिष्ठ। इत एवा[21]गच्छति देवीभिः सह जिष्णुर्देवः[22]।

[ततः प्रविशति देवीभिः सहितो महावीरः।]

विदूषकः—स्वस्ति वयस्याय। स्वस्ति देवीभ्यः। स्वस्ति समस्तेभ्यः। फलितं मम व्रतम्। दक्षिणां यच्छत महाब्राह्मणाय।

देव्यो महावीरश्च[23]—किं यच्छामः ?

विदूषकः—अस्यां शुभायां वेलायां, वत्सेन सहितां धेनुं, सुवर्णानां शतं च दत्त्वाशीर्वादं लभध्वम्।

देव्यो महावीरश्च—धेनूनां शतं, सुवर्णानां सहस्रमपि दत्तम्।

---

१६ दुष्टः + एव = दुष्ट एव; १७ भक्तिः + नष्टा = भक्तिर्नष्टा; १८ चिन्तितः + उपायः = चिन्तित उपायः; १९ दुष्टः + अविवेकः + महिषीः = दुष्टोऽविवेको महिषीः; २० फलितः + अस्माकं = फलितोऽस्माकं; २१ इतः + एव = इत एव; २२ जिष्णुः + देवः = जिष्णुर्देवः; २३ देव्यः + महावीरश्च = देव्यो महावीरश्च.

विदूषकः—सन्तुष्टोऽस्मि[24]। अयमपि दत्त आशीर्वादः। "शान्तिरस्तु[25], पुष्टिरस्तु[26], तुष्टिरस्तु[27], वृद्धिरस्तु[28], अविघ्नमस्तु, आयुष्यमस्तु, आरोग्यमस्तु, कर्मसमृद्धिरस्तु[29], धर्मसमृद्धिरस्तु, शास्त्रसमृद्धिरस्तु, पुत्रसमृद्धिरस्तु, धनधान्यसमृद्धिरस्तु।"

तथा च— "स्वस्ति प्रजाभ्यः, परिपालयन्तां
न्याय्येन मार्गेण महीं महीशाः।
गोब्राह्मणेभ्यः शुभमस्तु लोके
लोकाः समस्ताः सुखिनो भवन्तु॥
काले वर्षतु पर्जन्यः, पृथिवी सस्यशालिनी।
देशोऽयं[30] क्षोभरहितो ब्राह्मणाः[31] सन्तु निर्भयाः॥
ॐ शान्तिः शान्तिः शान्तिः।"

[इति निष्क्रान्ताः।]

VOCABULARY

अपवृत्त (*Adj.*) One leading an objectionable mode of life.
अविनय (*m.*) Rudeness.
आहूय (*Ger.*) Having invited or called.
उक्त (*pp. pass.*) said; spoken; told.
उपगत (*pp. pass.*) Approached; come to.
कम् [कामयते] To love; to desire for.
क्षोभरहित (*Adj.*) Free from trouble.
गणिका (*f.*) A courtezan.
चित्र (*n.*) Wonder.
जिष्णु (*Adj.*) Victorious.
तुष्टि (*f.*) Satisfaction.
धृति (*f.*) Courage; comfort.
निरस्त (*pp. pass.*) Cast off; thrown away.
पुरतः (*Indecl.*) In front of.
पुष्टि (*f.*) Prosperity; fatness; increase.
प्रच्छ् [पृच्छति] To ask. [This root generally governs two objects.]

---

२४ सन्तुष्टः + अस्मि = सन्तुष्टोऽस्मि; २५ शान्तिः + अस्तु = शान्तिरस्तु; २६ पुष्टिः + अस्तु = पुष्टिरस्तु; २७ तुष्टिः + अस्तु = तुष्टिरस्तु; २८ वृद्धिः + अस्तु = वृद्धिरस्तु; २९ कर्मसमृद्धिः + अस्तु = कर्मसमृद्धिरस्तु; ३० देशः + अयं = देशोऽयं; ३१ क्षोभरहितः + ब्राह्मणाः = क्षोभरहितो ब्राह्मणाः.

प्रतीहारी (*f.*) A female attendant.
प्रवृत्ति (*f.*) News; information.
भण् [भणति] To speak; to say.
महिषी (*f.*) A queen.
मास (*m.*) A month.
रम् [रमते] To sport; to enjoy.
राशि (*m.*) A heap.
वक्तुम् (*Inf.*) For the purpose of speaking; in order to speak.
वनिता (*f.*) A woman.
वयस्य (*m.*) A friend.
सस्यशालिनी (*f.*) Yielding plenty of corn; fertile.
स्निह् [स्निह्यति] To love; to feel affection for. [Used with the Locative of a noun.]
स्वस्ति (*Indecl.*) Hail! Adieu! [Used with the Dative of a noun.]

GRAMMAR :—

११ 'प्रीति', Feminine noun ending in 'इ'.

	Sing.	Du.	Pl.
N.	प्रीतिः	प्रीती	प्रीतयः
Ac.	प्रीतिम्	प्रीती	प्रीतीः
I.	प्रीत्या	प्रीतिभ्याम्	प्रीतिभिः
D.	प्रीत्यै / प्रीतये	प्रीतिभ्याम्	प्रीतिभ्यः
Ab.	प्रीत्याः / प्रीतेः	प्रीतिभ्याम्	प्रीतिभ्यः
G.	प्रीत्याः / प्रीतेः	प्रीत्योः	प्रीतीनाम्
L.	प्रीत्याम् / प्रीतौ	प्रीत्योः	प्रीतिषु
V.	प्रीते	प्रीती	प्रीतयः

Feminine nouns ending in 'इ' such as नीति, कीर्ति, etc. are similarly declined.

१२ 'धेनु', Feminine noun ending in 'उ'.

	Sing.	Du.	Pl.
N.	धेनुः	धेनू	धेनवः
Ac.	धेनुम्	धेनू	धेनूः
I.	धेन्वा	धेनुभ्याम्	धेनुभिः
D.	धेन्वै / धेनवे	धेनुभ्याम्	धेनुभ्यः
Ab.	धेन्वाः / धेनोः	धेनुभ्याम्	धेनुभ्यः
G.	धेन्वाः / धेनोः	धेन्वोः	धेनूनाम्
L.	धेन्वाम् / धेनौ	धेन्वोः	धेनुषु
V.	धेनो	धेनू	धेनवः

Feminine nouns ending in 'उ' such as तनु, चञ्चु, etc. are similarly declined.

ABOUT ADJECTIVES :—

Adjectives ending in 'इ' are declined like शिवि in the masculine, like प्रीति in the feminine, and like वारि in the neuter.

Adjectives ending in उ are declined like साधु in the masculine, like धेनु in the feminine, and like अश्रु in the neuter.

But if the final vowel of adjectives ending in 'उ' is not preceded by a conjunct consonant, a second feminine base may be optionally formed by adding 'ई' to them. These feminine bases ending in 'ई' are declined like जननी.

E. g.		Adjectives	Feminine bases.
		साधु	साधु or साध्वी
		बहु	बहु or बह्वी
		मृदु	मृदु or मृद्वी
		गुरु	गुरु or गुर्वी
	But	पाण्डु	पाण्डु only
		वल्गु	वल्गु only

Exceptions :—

The feminine base of पङ्गु is पङ्गू; and that of भीरु is भीरु or भीरू. These feminine bases ending in ऊ are declined like वधू.

SANDHI RULES :—

S. R. No. 11.

Preceded by	Final	Followed by	Result
अ	Visarga	Any soft consonant	The preceding अ and the *visarga* are to-gether changed to ओ.
आ	,,	,,	The *visarga* is dropped and no *sandhi* after that.
Any vowel except अ or आ	,,	,,	The *visarga* is changed to र्. This र् is dropped if followed by र् and the preceding vowel if short is made long.
अ	,,	अ	The *visarga,* the preceding अ and the following अ are together changed to ओ. The following अ that has merged in ओ is generally shown by the *avagraha* (ऽ) sign.
अ	,,	Any vowel except अ	The *Visarga* is dropped and no *sandhi* after that.
आ	,,	Any vowel	The *Visarga* is dropped and no *sandhi* after that.
Any vowel except अ or आ	,,	Any vowel	The *Visarga* is changed to र्. This र् simply combines with the following vowel.

E. g. प्रियः वयस्यः — प्रियो वयस्यः।
ताः मासेन — ता मासेन।
कीर्तिः भृशम् — कीर्तिर्भृशम्।
सेनाभिः रक्षितः — सेनाभिर् रक्षितः = सेनाभी रक्षितः।
आर्यपुत्रः अस्मासु — आर्यपुत्रोऽस्मासु।
वयस्यः इति — वयस्य इति।
गणिकाः एव — गणिका एव।
शान्तिः अस्तु — शान्तिरस्तु।

LANGUAGE-STUDY :—

१ गणिका एव वयस्यस्य प्रीतेः **पात्रम्**।
स दुष्ट एव तस्य विश्वासस्य **स्थानम्**।

When, as in the above sentences, 'पात्रम्', 'स्थानम्', etc. are used as predicates in a sentence, they are always used in the *neuter gender* and *singular number*.

In such cases the forms of 'अस्' (to be) are understood. If these forms are to be used, they must be made to agree with the subject proper in person and number; but not with the words 'पात्रम्', 'स्थानम्', etc.

E. g.—**गणिका** एव वयस्यस्य प्रीतेः पात्र**मासन्**।

PECULIAR CONSTRUCTIONS :—

१ ताभ्यः सदैव क्रुद्धः।
२ आर्यपुत्रोऽस्मासु पूर्ववत् **स्निह्येत्**।
३ **स्वस्ति** देवीभ्यः।
४ **तथा** यतस्व, **यथा**र्यपुत्रोऽस्मासु पूर्ववत् स्निह्येत्।
५ किं व्रतेन? किं बोधेन?
६ अधुना तव व्रतेन नास्ति तासां **प्रयोजनम्**।

HOME-WORK :—

1. Write down in brief the story of **मन्त्रसिद्धि.**
2. Answer the following questions in Sanskrit :—

(अ) का एतस्य नृपस्य महिष्यः ?

(आ) किमर्थं स तासु तुष्टिं नालभत ?

(इ) तस्य प्रीतिं लब्धुं ताभिः क उपायः कृतः ?

(ई) अमात्यस्य क उपायः ?

(उ) कस्योपायः सिद्धिं गतः ? अमात्यस्य विदूषकस्य वा ?

(ऊ) विदूषकेण क आशीर्वादो दत्तः ?

3. Dissolve the following *sandhis* :—

पुरतस्तवाविनयम्; आयुष्यमस्तु; दत्त्वाशीर्वादम्; देव्यपि; देव्यश्च; किन्त्वस्माकम्.

द्वादशः पाठः

समान्वयः ।

एतत् प्रायेण सर्वेषां श्रुतिविषयमापतितमेव यथा स्वर्गलोके सुराङ्गनाः सन्तीति । तासामेतानि कुलानि । एकं कमलयोनेः समुत्पन्नम् । अन्यत् वेदेभ्यः सम्भूतम् । अन्यत् अग्नेरुद्भूतम् । अन्यत् पवनात् प्रसूतम् । अन्यत् अमृतात् उत्थितम् । अन्यत् जलात् जातम् । अन्यत् अर्ककिरणेभ्यो निर्गतम् । अन्यत् सोमरश्मिभ्यो निष्पतितम् । अन्यत् भूमेरुद्भूतम् । अन्यत् सौदामिनीभ्यः प्रवृत्तम् । अन्यत् मृत्युना निर्मितम् । अपरं मकरकेतुना समुत्पादितम् । अन्यत् तु दक्षस्य प्रजापतेरतिप्रभूतानां कन्यकानां मध्ये द्वे सुते मुनिररिष्टा चाभवताम् । ताभ्यां गन्धर्वैः सह कुलद्वयं जातम् ।

अत्र मुनेस्तनयश्चित्ररथो नाम समुत्पन्नः । स किल शैशव एव सर्वेषां गन्धर्वाणामाधिपत्यमलभत । तस्य हेमकूटो नाम निवासः ।

अरिष्टायास्तु हंसो नाम पुत्रस्तस्मिन् द्वितीये गन्धर्वकुले चित्ररथेनाभिषिक्तो बाल एव राज्यपदमध्यगच्छत् । तस्यापि स एव गिरिरधिवासः ।

यत् तु सोममयूखेभ्यः सम्भूतं सुराङ्गनानां कुलं तस्मात् त्रिभुवननयनाभिरामा, द्वितीयेव गौरी, गौरी नाम कन्यका प्रसूता । तां च हंसः, मन्दाकिनीमिव क्षीरसागरः, पर्यणयत् । सा तु मकरकेतनेनेव रतिः, शरत्समयेनेव कमलिनी, हंसेन संयोजितातीवामोदत ।

तयोश्च तादृशयोरहमीदृशी विगतलक्षणा शोकायैव केवलमेकैवात्मजा समुत्पन्ना ।

—कादम्बरी (Adapted)

VOCABULARY

अधिवास (*m.*) An abode; a dwelling place.
अन्य (*Pron.*) Another; different.
अर्ककिरण (*m.*) A ray of the sun.
आत्मजा (*f.*) A daughter.
ईदृशी (*Adj. f. base*) Such; of this kind.
कमलयोनि (*m.*) The Creator; Brahman.
गौरी (*f.*) An epithet of Pārvatī.
त्रिभुवन-नयनाभिरामा (*Adj. f. base*) Attractive to the eyes of the three worlds.
निवास (*m.*) An abode.
परि+नी [परिणयति] To marry.
प्रवृत्त (*pp. pass.*) Started; originated.
प्रायेण (*Indecl.*) Generally.
मकरकेतन, मकरकेतु (*m.*) The god of love; Madana.
मन्दाकिनी (*f.*) The Ganges.
रति (*f.*) The name of Madana's wife.
विगत-लक्षणा (*Adj. f. base*) Inauspicious.
शरत्समय (*m.*) The spring season.
श्रुतिविषय (*m.*) Hearing; the range of the ear.
शैशव (*n.*) Childhood.
सुता (*f.*) A daughter.
सुराङ्गना (*f.*) A heavenly nymph.
सोम-मयूख, सोम-रश्मि (*m.*) A ray of the moon.
सौदामिनी (*f.*) The lightning.

GRAMMAR :—

Pronouns

'सर्व' Masculine

	Sing.	Du.	Pl.
N.	सर्वः	सर्वौ	सर्वे
Ac.	सर्वम्	सर्वौ	सर्वान्
I.	सर्वेण	सर्वाभ्याम्	सर्वैः
D.	सर्वस्मै	सर्वाभ्याम्	सर्वेभ्यः
Ab.	सर्वस्मात्	सर्वाभ्याम्	सर्वेभ्यः
G.	सर्वस्य	सर्वयोः	सर्वेषाम्
L.	सर्वस्मिन्	सर्वयोः	सर्वेषु

'सर्व' Feminine

	Sing.	Du.	Pl.
N.	सर्वा	सर्वे	सर्वाः
Ac.	सर्वाम्	सर्वे	सर्वाः
I.	सर्वया	सर्वाभ्याम्	सर्वाभिः
D.	सर्वस्यै	सर्वाभ्याम्	सर्वाभ्यः
Ab.	सर्वस्याः	सर्वाभ्याम्	सर्वाभ्यः
G.	सर्वस्याः	सर्वयोः	सर्वासाम्
L.	सर्वस्याम्	सर्वयोः	सर्वासु

'सर्व' Neuter.

	Sing.	Du.	Pl.
N.	सर्वम्	सर्वे	सर्वाणि
Ac.	सर्वम्	सर्वे	सर्वाणि

The rest like the masculine.

SOME IRREGULARITIES:—

1. The pronoun प्रथम is declined like भूप in the masculine, like सीता in the feminine, its feminine base being प्रथमा, and like वन in the neuter. But it has an optional form in the Nominative plural masculine like that of सर्व. Thus its Nominative plural masculine will be प्रथमाः or प्रथमे.

2. The pronoun द्वितीय is declined like भूप in the masculine, like सीता in the feminine, its feminine base being द्वितीया, and like वन in the neuter. But in all the three genders it has optional forms like those of सर्व in the Dative, Ablative, Genitive and Locative singular. Thus:—

	Masculine and Neuter Singular	Feminine Singular
Dative	द्वितीयाय, द्वितीयस्मै	द्वितीयायै, द्वितीयस्यै
Ablative	द्वितीयात्, द्वितीयस्मात्	द्वितीयायाः, द्वितीयस्याः
Genitive	द्वितीयस्य	द्वितीयायाः, द्वितीयस्याः
Locative	द्वितीये, द्वितीयस्मिन्	द्वितीयायाम्, द्वितीयस्याम्

3. The pronouns अन्य and इतर are declined like सर्व in all the three genders except in the Nominative and Accusative singular neuter where the forms are अन्यत्–अन्यद् and इतरत्–इतरद् respectively.

4. The pronouns स्व, पर, अपर and पूर्व are declined like सर्व in all the three genders; but they have optional forms in the Ablative and Locative singular, masculine and neuter, and in the

Nominative plural, masculine, like those of भूप and वन. There are no optional forms in the feminine. Thus:—

	स्व	पर	अपर	पूर्व
Masculine Nominative plural	स्वे स्वाः	परे पराः	अपरे अपराः	पूर्वे पूर्वाः
Masculine & Neuter Ablative singular	स्वस्मात् स्वात्	परस्मात् परात्	अपरस्मात् अपरात्	पूर्वस्मात् पूर्वात्
Masculine & Neuter Locative singular	स्वस्मिन् स्वे	परस्मिन् परे	अपरस्मिन् अपरे	पूर्वस्मिन् पूर्वे

5. The pronoun एक is declined like सर्व in all the three genders; but it is declined only in the singular and the plural. In the singular it means '*one*' and in the plural it means '*some*'.

6. The pronoun उभ is declined like सर्व in all the three genders; but it is declined only in the dual.

7. The pronoun उभय is declined like सर्व in the masculine and the neuter. Its feminine base is उभयी and is declined like जननी. It is declined only in the singular and the plural.

8. द्वि is a numeral adjective. It is declined like उभ in all the three genders. Like उभ it is declined in the dual only. Its bases in the masculine, feminine, and neuter are द्व, द्वा and द्व respectively. Its full declension is given below.

	N.	Ac.	I.	D.	Ab.	G.	L.
Masculine	द्वौ	द्वौ	द्वाभ्याम्	द्वाभ्याम्	द्वाभ्याम्	द्वयोः	द्वयोः
Feminine	द्वे	द्वे	द्वाभ्याम्	द्वाभ्याम्	द्वाभ्याम्	द्वयोः	द्वयोः
Neuter	द्वे	द्वे	द्वाभ्याम्	द्वाभ्याम्	द्वाभ्याम्	द्वयोः	द्वयोः

ADDITIONAL EXERCISES :—

मुकुटे रोपितः[1] काचश्चरणाभरणे[2] मणिः ।
न हि दोषो मणेरस्ति, किन्तु साधोरविज्ञता[3] ॥

1. Placed; 2. Glass (a bead of glass); 3. Inability to appreciate the good.

न कश्चित् कस्यचित् मित्रं, न कश्चित् कस्यचित् रिपुः ।
कारणेन हि जायन्ते मित्राणि रिपवस्तथा ॥

अप्रगल्भस्य या विद्या, कृपणस्य च यत् धनम् ।
यत् च बाहुबलं भीरोर्व्यर्थमेतत् त्रयं क्षितौ ॥

न च विद्यासमो बन्धुर्न च व्याधिसमो रिपुः ।
न चापत्यसमस्नेहो न च दैवात् परं बलम् ॥

TRANSLATE :—

The Uses of Milk.

The uses of milk are many. It is very nutritious to the body as it contains vitamins. It is sweet to the taste; therefore even small children drink it with joy. Its colour is white; but the milk of different animals smells differently. Curds are produced from milk; butter-milk from curds; butter from butter-milk; and ghee from butter. All these products are necessary for the life of man.

New words :—दुग्धम्; उपयोगः; जीवनद्रव्यम्; पुष्टिकर; स्वादः; अर्भकः; आनन्दः; पा; श्वेत; पशुः; गन्धः; द्रप्सम्; तक्रम्; नवनीतम्; पदार्थः; घृतम्.

HOME-WORK :—

1 Compare and contrast a horse and a lion.
2 Decline fully उभय, इतर and अन्य.
3 Give in brief an account of your own family.

---

4. A shy person; 5. A timid person; 6. Greater.

त्रयोदशः पाठः

सम्बन्धाः कस्य न प्रियाः ?

आवां भ्रातरौ। अहं कनिष्ठः, एष ज्येष्ठः। मम मातैतस्य मातुः सपत्नी। ते मम पितुर्भार्ये एव।

ममैका स्वसास्ति। सा मे ज्येष्ठा भगिनी। सा मम पित्रोर्दुहिता। सा तस्या भर्तुर्गृहे निवसति। स मम पितुर्जामाता। मम माता तस्य श्वश्रूः। पिता च मे तस्य श्वशुरो भवति।

मम स्वसुर्भर्तुर्बहवो भ्रातरः सन्ति। ते मम स्वसुर्देवरो भवन्ति। देवुर्भार्या याता।

मम स्वसा मम भार्याया ननान्दा। अहं मम स्वसुः पुत्राणां मातुलः। मम पत्नी तेषां मातुलानी। ते मम स्वस्रीयाः। मम पिता तेषां मातामहः। तस्य च ते दौहित्राः। मम पिता मम पुत्राणां पितामहः। तस्य च ते नप्तारः।

अहं मम भ्रातुः पुत्राणां पितृव्यः। ते च मम भ्रात्रीयाः। मम भ्रातुर्भार्या मे प्रजावती।

यथा मम पितास्माकं कुलस्य पाता, तथैव नृणां रक्षिता नृपः।

VOCABULARY

दुहितृ (*f.*) A daughter.
देवृ (*m.*) A husband's brother.
दौहित्र (*m.*) A daughter's son.
ननान्दृ (*f.*) A husband's sister.
नप्तृ (*m.*) A grandson.
नृ (*m.*) A man.
प्रजावती (*f.*) A brother's wife.
पातृ (*Adj.*) A protector.
पितृव्य (*m.*) A paternal uncle.
भर्तृ (*m.*) A husband; a master.
भ्रातृ (*m.*) A brother.
भ्रात्रीय (*m.*) A brother's son; a nephew.
मातुलानी (*f.*) The wife of a maternal uncle.
यातृ (*f.*) A husband's brother's wife.
रक्षितृ (*Adj.*) A protector.
सपत्नी (*f.*) A cowife.
स्वसृ (*f.*) A sister.
स्वस्रीय (*m.*) A sister's son; a nephew.

GRAMMAR:—

13. 'पितृ', Masculine noun ending in 'ऋ'.

	Sing.	Du.	Pl.
N.	पिता	पितरौ	पितरः
Ac.	पितरम्	पितरौ	पितॄन्
I.	पित्रा	पितृभ्याम्	पितृभिः
D.	पित्रे	पितृभ्याम्	पितृभ्यः
Ab.	पितुः	पितृभ्याम्	पितृभ्यः
G.	पितुः	पित्रोः	पितॄणाम्
L.	पितरि	पित्रोः	पितृषु
V.	पितर् / पितः	पितरौ	पितरः

Of the masculine nouns ending in 'ऋ', only भ्रातृ, जामातृ, देवृ, नृ and सव्येष्टृ, are declined like पितृ. But नृ has two forms in the Genitive plural. They are:—नृणाम् and नॄणाम्.

14. 'रक्षितृ' Masculine word ending in 'ऋ'.

	Sing.	Du.	Pl.
N.	रक्षिता	रक्षितारौ	रक्षितारः
Ac.	रक्षितारम्	रक्षितारौ	रक्षितॄन्
I.	रक्षित्रा	रक्षितृभ्याम्	रक्षितृभिः
D.	रक्षित्रे	रक्षितृभ्याम्	रक्षितृभ्यः
Ab.	रक्षितुः	रक्षितृभ्याम्	रक्षितृभ्यः
G.	रक्षितुः	रक्षित्रोः	रक्षितॄणाम्
L.	रक्षितरि	रक्षित्रोः	रक्षितृषु
V.	रक्षितर् / रक्षितः	रक्षितारौ	रक्षितारः

All other masculine nouns ending in 'ऋ' except the five mentioned under पितृ and also adjectives ending in 'ऋ' and in the masculine gender are declined similarly.

15. 'मातृ', Feminine noun ending in 'ऋ'.

	Sing.	Du.	Pl.
N.	माता	मातरौ	मातरः
Ac.	मातरम्	मातरौः	मातॄः
I.	मात्रा	मातृभ्याम्	मातृभिः
D.	मात्रे	मातृभ्याम्	मातृभ्यः
Ab.	मातुः	मातृभ्याम्	मातृभ्यः
G.	मातुः	मात्रोः	मातॄणाम्
L.	मातरि	मात्रोः	मातृषु
V.	मातर् / मातः	मातरौ	मातरः

Of the feminine nouns ending in 'ऋ' only यातृ, ननान्दृ and दुहितृ are declined like मातृ.

16. 'स्वसृ', Feminine noun ending in 'ऋ'.

	Sing.	Du.	Pl.
N.	स्वसा	स्वसारौ	स्वसारः
Ac.	स्वसारम्	स्वसारौ	स्वसॄः
I.	स्वस्रा	स्वसृभ्याम्	स्वसृभिः
D.	स्वस्रे	स्वसृभ्याम्	स्वसृभ्यः
Ab.	स्वसुः	स्वसृभ्याम्	स्वसृभ्यः
G.	स्वसुः	स्वस्रोः	स्वसॄणाम्
L.	स्वसरि	स्वस्रोः	स्वसृषु
V.	स्वसर् / स्वसः	स्वसारौ	स्वसारः

17. 'रक्षितृ', Neuter word ending in 'ऋ'.

	Sing.	Du.	Pl.
N.	रक्षितृ	रक्षितृणी	रक्षितॄणि
Ac.	रक्षितृ	रक्षितृणी	रक्षितॄणि
I.	रक्षितृणा	रक्षितृभ्याम्	रक्षितृभिः
D.	रक्षितृणे	रक्षितृभ्याम्	रक्षितृभ्यः
Ab.	रक्षितृणः	रक्षितृभ्याम्	रक्षितृभ्यः
G.	रक्षितृणः	रक्षितृणोः	रक्षितॄणाम्
L.	रक्षितृणि	रक्षितृणोः	रक्षितृषु
V.	रक्षितृ / रक्षितर् / रक्षितः	रक्षितृणी	रक्षितॄणि

ABOUT ADJECTIVES:—

Adjectives ending in 'ऋ' are declined in the masculine and the neuter like रक्षितृ. Their feminine bases are formed by adding ई to them. Thus पातृ + ई = पात्री. These bases ending in 'ई' are declined like जननी. But the feminine base of नृ is नारी.

E. g. पातृः—

	Sing.	Du.	Pl.
Mas. Nom.	पाता	पातारौ	पातारः
Neu. Nom.	पातृ	पातृणी	पातॄणि
Fem. Nom.	पात्री	पात्र्यौ	पात्र्यः

ADDITIONAL EXERCISES:—

वन्दे मातरम्।

सुजलां, सुफलां, मलयज-शीतलां
सस्य-श्यामलां। मातरम् ॥ ध्रु० ॥
शुभ्र-ज्योत्स्ना-पुलकित-यामिनीं,
फुल्ल-कुसुमित-द्रुम-दल-शोभिनीं,
सुहासिनीं, सुमधुर-भाषिणीं,
सुखदां, वरदां, मातरम् ॥ १ ॥
अमृतं दुर्लभं नृणां, देवानामुदकं तथा।
पितॄणां दुर्लभः पुत्रस्तक्रं शक्रस्य दुर्लभम् ॥
ऋणकर्ता पिता शत्रुर्माता च व्यभिचारिणी।
अविनीता रिपुर्भार्या, पुत्रः शत्रुरपण्डितः ॥
अदाता वंशदोषेण, कर्मदोषात् दरिद्रता।
उन्मादो मातृदोषेण, पितृदोषेण मूर्खता ॥

---

1 Sandal; 2 Green; 3 The moonlight; 4 The night; 5 A tree; 6 An epithet of Indra; 7 Immodest; uneducated; 8 Madness.

उत्तमं स्वार्जितं वित्तं, मध्यमं पितुरर्जितम्।
कनिष्ठं भ्रातृवित्तं च, स्त्रीवित्तमधमाधमम् ॥

TRANSLATE :—

The Kauravas and the Pāṇḍavas.

The Kauravas and the Pāṇḍavas were kinsmen; for Dhṛtarāṣtra and Pāṇḍu were brothers.

The Kauravas were the haters of the Pāṇḍavas from their childhood. They did not tolerate their greatness and good qualities. They did such acts as did sow the seeds of war in the hearts of both the parties even in their childhood.

Draupadī was the wife of the Pāṇḍavas. She was very beautiful; therefore Duryodhana began to desire for her. The Kauravas thought that they were insulted at the time of the Rājasūya sacrifice. The Kauravas invited the Pāṇḍavas for a gambling bout in order to take vengeance for this insult. The Kauravas fraudulently defeated the Pāṇḍavas in it. In that gambling bout even Draupadī was staked. She was their brothers' wife. Yet those wicked people seized her by her hair and dragged her before the assembly. Therefore the Pāṇḍavas became ready to take vengeance for this insult. In the end the Pāṇḍavas became victorious.

New words:—दायादः; बाल्यम्; द्वेष्टृ; वैभवम्; सह्; कृत्यम्; युद्धम्; उप्त; राजसूयः; यज्ञः; अवमत; प्रतिकर्तुम्; द्यूतम्; आ+ह्वे; कपटं आश्रित्य; परा+जि; पणित; केशेषु गृहीत्वा; सभा; आकृष्य; संनद्ध; अन्ते; वि+जि.

HOME-WORK :—

1. Decline fully नृ, देवृ, भर्तृ and ननान्दृ.
2. Give a short description of your mother-land after the style of the song वन्दे मातरम्.
3. Join according to *sandhi* rules:—

   भार्ये एव; स्वसुः पुत्राणाम्; भर्तुः गृहम्; पुत्रः तत्रम्; मातृदोषेण उन्मादः.
4. Give the feminine bases of:—

   रक्षितृ, गन्तृ, नेतृ, द्वेष्टृ and वक्तृ.

चतुर्दशः पाठः

सोमः ।

अयं सोमः । निशायामुदयतेऽसौ । सूर्योऽस्मै प्रकाशं प्रयच्छति । एष सर्वेषां नक्षत्राणां नृपस्तथैव सर्वासामोषधीनामधिपः । एवं जनाः कथयन्ति ।

अमुष्य प्रकाशोऽतीव शीत आल्हादकश्च । अमुष्मिन् सर्वे देवाः स्निह्यन्ति, यतस्त इमममृतस्योदधिं मन्यन्ते । प्रतिदिनं देवा अस्यैकामेकाममृतेन परिप्लुतां कलां पिबन्त्यत एवासौ क्षयतीति जनानामुक्तिः । अपरस्मिन् पक्षेऽयं क्रमेण पुनर्वर्धते ।

एतस्मिन् एव विषयेऽन्याप्येका कथा वर्तते । सैवम्—

दक्षेण प्रजापतिना स्वस्य कन्यकासु का अप्यस्मायिन्दवे प्रदत्ताः। परमसौ रोहिण्यामेवात्यन्तमस्निह्यत्। एवं मत्सरेण पीडितास्ताः पितरमासाद्याभाषन्त—"तात, एषोऽस्माकं भर्ता केवलं रोहिणीमेवावलोकयति, नास्मान्। वयमतः परं तत् सोढुं न पारयामः" इति। तासां वचनं श्रुत्वाविचार्यैव दक्षस्तमशपत्—'यथा चन्द्रः स्वस्येतरा भार्यास्त्यक्त्वैकां रोहिणीमेव भजते, तथा स क्षयरोगेण पीडितो भवतु' इति। ततः सर्वास्ताः पत्न्यो हृष्टा गृहं न्यवर्तन्त। इमा अचिन्तयन्—"अधुना भयं प्राप्य नो भर्ता योग्यं समाचरेत्" इति। परं विपरीतमिव ता अपश्यन्। प्रतिदिनं स क्षयेण क्षीणतरोऽभवत्। अचिरात् एवामुं मृत्युर्ग्रसेत् इतीमा अशङ्कन्त। ततो भीतिमापन्नास्ताः पुनः पितरमुपगम्य तं भर्तुर्विवृद्धिमयाचन्त। तस्मात् स आदिशत्—"चन्द्र एकस्मिन् पक्षे क्षयं गच्छेत्, अपरस्मिन् च पक्षे पुनर्वृद्धिम्" इति।

अन्येषु देशेष्वन्याः कथाः प्रचलिताः सन्त्यस्मिन् विषये।

VOCABULARY

अचिरात् (*Indecl.*) Soon.
अदस् (*Pron.*) This or that.
अविचार्य (*Ger.*) Without thinking.
आपन्न (*pp. pass.*) Reduced; come to.
इदम् (*Pron.*) This.
ओषधि (*f.*) A herb; a medicinal plant.
क्षि [क्षयति] To wear out; to waste away.
ग्रस् [ग्रसति] To swallow.
चिन्त् [चिन्तयति-ते] To think.
नि + वृत् [निवर्तते] To return.
परिप्लुत (*pp. pass.*) Overflowing; dripping.
पार् [पारयति-ते] To be able.
प्राप्य (*Ger.*) Having reached.
मन् [मन्यते] To think.
याच् [याचते] To beg. [This root generally governs two objects.]
शङ्क् [शङ्कते] To doubt; to guess; to apprehend.
सोढुम् (*Inf.*) In order to tolerate.
हृष्ट (*pp. pass.*) Pleased.

GRAMMAR :—

Pronouns

अदस् Masculine

	Sing.	Du.	Pl.
N.	असौ	अमू	अमी*
Ac.	अमुम्	अमू	अमून्
I.	अमुना	अमूभ्याम्	अमीभिः
D.	अमुष्मै	अमूभ्याम्	अमीभ्यः
Ab.	अमुष्मात्	अमूभ्याम्	अमीभ्यः
G.	अमुष्य	अमुयोः	अमीषाम्
L.	अमुष्मिन्	अमुयोः	अमीषु

* The final vowel of this remains unchanged before all vowels.

अदस् Feminine

	Sing.	Du.	Pl.
N.	असौ	अमू	अमूः
Ac.	अमुम्	अमू	अमूः
I.	अमुया	अमूभ्याम्	अमूभिः
D.	अमुष्यै	अमूभ्याम्	अमूभ्यः
Ab.	अमुष्याः	अमूभ्याम्	अमूभ्यः
G.	अमुष्याः	अमुयोः	अमूषाम्
L.	अमुष्याम्	अमुयोः	अमूषु

अदस् Neuter

	Sing.	Du.	Pl.
N.	अदः	अमू	अमूनि
Ac.	अदः	अमू	अमूनि

The rest like the masculine.

इदम् Masculine

	Sing.	Du.	Pl.
N.	अयम्	इमौ	इमे
Ac.	इमम् / एनम्	इमौ / एनौ	इमान् / एनान्
I.	अनेन / एनेन	आभ्याम्	एभिः
D.	अस्मै	आभ्याम्	एभ्यः
Ab.	अस्मात्	आभ्याम्	एभ्यः
G.	अस्य	अनयोः / एनयोः	एषाम्
L.	अस्मिन्	अनयोः / एनयोः	एषु

इदम् Feminine

	Sing.	Du.	Pl.
N.	इयम्	इमे	इमाः
Ac.	इमाम् / एनाम्	इमे / एने	इमाः / एनाः
I.	अनया / एनया	आभ्याम्	आभिः
D.	अस्यै	आभ्याम्	आभ्यः
Ab.	अस्याः	आभ्याम्	आभ्यः
G.	अस्याः	अनयोः / एनयोः	आसाम्
L.	अस्याम्	अनयोः / एनयोः	आसु

इदम् Neuter.

	Sing.	Du.	Pl.
N.	इदम्	इमे	इमानि
Ac.	इदम्	इमे	इमानि
	एनत्	एने	एनानि
	एनद्		

The rest like the masculine.

LANGUAGE-STUDY:—

त इमममृतस्योदधिं मन्यन्ते ।

In this sentence the word उदधि is used as a complement. As it is connected with इमम्, the object, it is used in the Accusative.

This sentence may be written in another way to give the same sense. Thus:—

अयममृतस्योदधिरिति ते मन्यन्ते ।

PECULIAR CONSTRUCTIONS:—

ताः पितरमुपगम्य तं भर्तुर्विवृद्धिमयाचन्त ।

ADDITIONAL EXERCISES:—

विद्याप्रियस्य भोजस्य ।

कदाचित् भोजो नृपः सिंहासन आसीनः[1] काञ्चित् कुम्भकारस्य वधूं सभाया द्वारे समुपस्थितामवालोकयत्। अन्तः प्रविष्टा पृष्टा च सा प्रणम्य सादरमभाषत[2]—“देव, मम वल्लभः कुम्भकारः। तेन पृथ्वी खनिता[3]। ततः किञ्चन सुवर्णभाण्ड-मन्तः पश्यति। अहं देवं कथयितुमत्र तस्याज्ञयैवागच्छम्” इति।

नृपश्चमत्कृतो निधानस्य[4] तं कलशमानयत्। यावत् अमुं पश्यति, तावत् अन्तस्थं मणिप्रभामण्डलमालोक्य कुम्भकारं पृच्छति—“किमेतत् कुम्भकार?”

सोऽभाषत—

“राजचन्द्रं समालोक्य त्वां तु भूतलमागतम्।
रत्नश्रेणिमिषोत्[5] मन्ये नक्षत्राण्यभ्युपाव्रजन्[6]॥” इति.

---

1 Seated; 2 Respectfully; 3 Dug; 4 Store of wealth; 5 In the form of a heap of jewels; 6 To come.

नृपः कुम्भकारस्य मुखात् श्लोकं लोकोत्तर[7]माकर्ण्य विस्मितस्तस्मै तं कलशं प्रायच्छत् ।

—भोजप्रबन्धः (Adapted)

TRANSLATE:—

There are many Purāṇas. Of these Rāmāyaṇa was written by Vālmīki. Vyāsa wrote Mahābhārta and many other Purāṇas. The work named Bhāgavata is also his. Besides these there are many minor Purāṇas. It is said that all these are the works of Vyāsa.

Every Āryan should read Bhārata, Bhāgavata, and Rāmāyaṇa if not all the Purāṇas. Some do not admit their greatness as religious works, but as poems they are undoubtedly great. There are many inspiring stories in these works. All the wisdom of our ancestors is stored in these. Many (philosophical) truths about God are also stored in these. If you find time do not forget to read these works at least once.

New words:—पुराणम् ; लिख् ; प्रत्येकः; वाच् ; धर्मग्रन्थः; योग्यता; बहु मन् ; काव्यम् ; निःसंशयम् ; श्रेष्ठ; स्फूर्तिदायिका; ज्ञानम् ; सङ्गृहीत; अधिकृत्य; तत्त्वम् ; बहुशः; अवसरं लभ् ; एकवारम् ; वाचयितुम् ; वि+स्मृ.

HOME-WORK:—

१. सोमस्येमां वान्यां वा कामपि कथां लिखत ।

२. चन्द्रोदयं वर्णयत ।

3. State the peculiarities of the following constructions:—

(अ) द्वे सुते मुनिररिष्टा चाभवताम् ।

(आ) सापि धनस्य राशिमेव मह्यमयच्छत् ।

(इ) ता मासेनापि न पश्यति ।

(ई) एतस्य विहगस्य मांसस्य भारेण समं तव शरीरस्य मांसं मह्यं प्रयच्छ ।

(उ) साधवः प्राणानां विनिमयेनापि रक्ष्याणां जीवितं रक्षन्ति ।

---

7 Extraordinary.

पञ्चदशः पाठः

न खलु पराक्रमोऽवस्थामपेक्षते।

[नेपथ्ये—मा खलु चापलमवलम्बस्व। कथं गत एव स्वां प्रकृतिम् !]

दुष्यन्तः—(कर्णं दत्त्वा) अभूमिरियमविनयस्य। कोऽनु खल्वेष एवं निवारितः ? (अवलोक्य, सविस्मयम्) अये, को न्वयं बालो यः प्रक्रीडितुं सिंहशिशुं बलात्कारेण कर्षति ?

[ततः प्रविशन्ति यथानिर्दिष्टो बालस्तापस्यौ च।]

बालः—जृम्भस्व सिंह, दन्तान् ते गणयामि।

ता. प्रथमा—अविनीत, किमिमानि सत्वानि पीडयसि ? हन्त ! वर्धते तव संरम्भः। स्थाने खलु मुनिभिः सर्वदमन इति तवाभिधानं कृतम्।

दुष्यन्तः—किं नु खलु बालेऽस्मिन् औरस इव पुत्रे स्निह्यति मे चित्तम् ?

ता. द्वितीया—एषा केसरिणी त्वां लङ्घयेत्, त्वं यदि तस्याः पुत्रकं न मुञ्चसि।

बालः—(सस्मितम्) अहो, बलवत् खलु भीतोऽस्मि।

ता. प्रथमा—वत्स, एनं बालमृगेन्द्रं मुञ्च । अपरं ते क्रीडनकं यच्छामि।

बालः—कुत्र ? यच्छ तत्। (इति हस्तं पुरो निक्षिपति।)

दुष्यन्तः—अये नृपस्य चिह्नान्यस्य हस्त इमानि।

ता. द्वितीया—सुव्रते, नैष एवं विरमति। गच्छ त्वम्। मदीय उटजे मार्कण्डेयस्यर्षिकुमारस्य वर्णेन चित्रितो मृत्तिकाया मयूरस्तिष्ठति। तमस्मायुपहर।

ता. प्रथमा—तथा। (इति निष्क्रान्ता।)

बालः—अनेनैव तावत् क्रीडामि। (इति तापसीं विलोक्य हसति।)

ता. द्वितीया—भवतु। न मामयं गणयति। कोऽत्रर्षिकुमाराणाम् ? (नृपमवलोक्य) भद्रमुख, आगच्छ। रक्ष डिम्भलीलया पीडितं बालमृगेन्द्रम्।

दुष्यन्तः—अयि भो महर्षिपुत्र, किमेवमाश्रमविरुद्धमाचरसि ?

ता. द्वितीया—भद्रमुख, नायमृषिकुमारः।

दुष्यन्तः—आकारेण सदृशं चेष्टितमेवास्य कथयति। स्थानस्य प्रत्ययेन हि वयमेवं तर्कयामः। (यथाभ्यर्थितमनुतिष्ठति। तस्यालिङ्गनस्य सुखमुपलभते।) अनेन कस्यापि कुलस्याङ्कुरेण गात्रेषु स्पृष्टस्य ममैवं सुखं भवति। ततः पुनर्यस्याङ्कात् अयं प्ररूढस्तस्य चित्तं कां निर्वृतिं भजेत् ?

ता. द्वितीया—(उभौ निर्वर्ण्य) आश्चर्यमाश्चर्यम् !

दुष्यन्तः—आर्ये, किमिव ?

ता. द्वितीया—अस्य बालस्य तवेवाकृतिरिति विस्मये।

दुष्यन्तः—(बालकमुपलालयति।) न चेत् ऋषिकुमारकोऽयं, अथ कोऽस्य व्यपदेशः ?

ता. द्वितीया—पुरुवंशः। अस्य मातास्मिन् तपोवने प्रसूता। सा किल भर्त्रा नृपेण परित्यक्तासीत्।

[प्रविश्य, मृत्तिका-मयूरं दत्त्वा]

ता. प्रथमा—सर्वदमन, शकुन्तलावण्यं पश्य।

बालः—कुत्र वा मे माता ?

ता. उभे—अभिधानस्य सादृश्येन वञ्चितो मातृवत्सलः। आगच्छ। मातरं प्रति गच्छामः।

—शाकुन्तलम् (Adapted)

VOCABULARY

अप + ईक्ष् [अपेक्षते] To desire.

अभूमि (*f.*) An improper place; absence of scope.

अव + लम्ब् [अवलम्बते] To depend upon; to take resort to.

अवस्था (*f.*) A state.

उटज (*m.* & *n.*) A hut.

उप + लाल् [उपलालयति-ते] To fondle; to caress.

केसरिणी (*f.*) A lioness.

क्रीडनक (*n.*) A toy.

गात्र (*n.*) A limb; the body.

चापल (*n.*) A rash act.

चेष्टित (*n.*) An act.

जृम्भ् [जृम्भते] To yawn.

डिम्भलीला (*f.*) Child's play; childish sport.

तर्क् [तर्कयति-ते] To guess; to infer.

नि + क्षिप् [निक्षिपति] To throw; to put.

निर्वृति (*f.*) Bliss; comfort.

प्रकृति (*f.*) Nature.

प्रत्यय (*m.*) Confidence; faith.

बलवत् (*Indecl.*) Very much.

लङ्घ् [लङ्घयति–ते] To attack; to spring upon.

वञ्चित (*pp. pass.*) Deceived.

वर्ण (*m.*) Colour.

वि + स्मि [विस्मयते] To wonder; to be surprised.

व्यपदेश (*m.*) A family; a name.

शकुन्तलावण्य (*n.*) The beauty of the bird.

सत्त्व (*n.*) A living being; strength.

संरम्भ (*m.*) Turbulence; rage.

स्थाने (*Indecl.*) Truly; appropriately.

LANGUAGE-STUDY:—

१ रामो लङ्कां गतः।
अद्य नद्यास्तीरं गच्छामः।

It will be observed that in Sanskrit roots indicative of *motion* are transitive and govern the Accusative of the place gone to. This rule holds good even if the motion is figurative.

E. g. अविवेकेन दुर्गतिं नीतो देवः।
गत एव स्वां प्रकृतिम्।

२ स्थानस्य प्रत्ययात् वयमेवं तर्कयामः।

In Sanskrit when the speaker is an important person he often refers to himself complacently in the plural. So also when the person refered to is a great person, he is also spoken of in the plural.

३ स्थाने खलु मुनिभिः सर्वदमन इति तवाभिधानं कृतम्।

Study carefully the meaning of the word **स्थाने** in the above sentence. It means *Truly*; *Appropriately*; *It is proper that...*

The translation of the above sentence will be :—

It is quite proper that you are named Sarvadamana by the sages.

ADDITIONAL EXERCISES:—

हंसो न भाति बलिभोजन-वृन्द-मध्ये
गोमायु-मण्डल-गतो न विभाति सिंहः।
जात्यो न भाति तुरंगः खर-यूथ-मध्ये
विद्वान् न भाति पुरुषेषु निरक्षरेषु॥
किं कोकिलस्य विरुतेन गते वसन्ते ?।
किं कातरस्य बहु-शस्त्र-परिग्रहेण ?।
मित्रेण किं व्यसन-काल-पराङ्मुखेन ?
किं जीवितेन पुरुषस्य निरक्षरेण ?॥

1 A crow; 2 A Flock; 3 A jackal; 4 Of excellent breed; 5 A horse; 6 An ass; 7 A herd; 8 Illiterate; 9 A note; a cry. 10 A timid person; 11 Equipping.

दरिद्रता धीरतया विराजते
कुरूपता शीलतया विराजते।
कुभोजनं चोष्णतया विराजते
कुवस्त्रता शुभ्रतया विराजते॥

मात्रा समं नास्ति शरीर-पोषणं,
चिन्तासमं नास्ति शरीर-शोषणम्।
भार्यासमं नास्ति शरीर-तोषणं,
विद्यासमं नास्ति शरीर-भूषणम्॥

सुखं हि दुःखान्यनुभूय शोभते
घनान्धकारेष्विव दीप-दर्शनम्।
सुखात् तु यो याति नरो दरिद्रतां
धृतः शरीरेण, मृतः स जीवति॥

HOME-WORK :—

1 Give in 15 lines the story of S'akuntalā as you know it.

2 Use the following words in sentences of your own :—

प्रति; स्निह्; गण्; सदृश; बलवत्;
जृम्भ्; दा; वि+रम्; इव; स्थाने.

3 Dissolve the following *sandhis*:—

अभूमिरियमविनयस्य। मृत्तिकाया मयूरस्तिष्ठति।
तमस्मायुपहर। कोऽत्रर्षिकुमाराणाम्। तवैवाकृतिरिति।

4 Write a grammatical note on the following :—

किं कोकिलस्य विरुतेन ?

---

12 Fortitude; courage; 13 A balm; 14 Pitch darkness; 15 Possessing; holding.

षोडशः पाठः

नीतिसप्तकम् ।

वरं पर्वतदुर्गेषु भ्रान्तं वनचरैः सह ।
न मूर्खजनसम्पर्कः सुरेन्द्रभवनेष्वपि ॥ १ ॥

आज्ञा कीर्तिः पालनं ब्राह्मणानां दानं भोगो मित्रसंरक्षणं च ।
येषामेते षड्गुणा न प्रवृत्ताः कोऽर्थस्तेषां पार्थिवोपाश्रयेण ॥ २ ॥

एको देवः केशवो वा शिवो वा, एकं मित्रं भूपतिर्वा यतिर्वा ।
एको वासः पत्तने वा वने वा, एका भार्या सुन्दरी वा दरी वा ॥३॥

वने रणे शत्रुजलाग्निमध्ये महार्णवे पर्वतमस्तके वा ।
सुप्तं प्रमत्तं विषमस्थितं वा रक्षन्ति पुण्यानि पुरा कृतानि ॥४॥

पत्रं नैव यदा करीरविटपे दोषो वसन्तस्य किं ?
नोलूकोऽप्यवलोकते यदि दिवा सूर्यस्य किं दूषणम् ? ।
धारानैव पतन्ति चातकमुखे मेघस्य किं दूषणम् ?
यत्पूर्वं विधिना ललाटलिखितं तद् मार्जितुं कः क्षमः ? ॥ ५ ॥

दाक्षिण्यं स्वजने, दया परिजने, शाठ्यं सदा दुर्जने,
प्रीतिः साधुजने, नयो नृपजने, विद्वज्जनेष्वार्जवम् ।
शौर्यं शत्रुजने, क्षमा गुरुजने, नारीजने धूर्तता,
ये चैवं पुरुषाः कलासु कुशलास्तेष्वेव लोकस्थितिः ॥ ६ ॥

को लाभो ? गुणिसङ्गमः, किमसुखं ? प्राज्ञेतरैः सङ्गतिः,
का हानिः ? समयच्युतिर्निपुणता का ? धर्मतत्त्वे रतिः, ।
कः शूरो ? विजितेन्द्रियः, प्रियतमा कानुव्रता, किं धनं ?
विद्या, किं सुखमप्रवासगमनं, राज्यं किमाज्ञाफलम् ॥ ७ ॥

—नीतिशतकम्

VOCABULARY

आर्जव (*n.*) Straightforwardness; sincerity; honesty.
उपाश्रय (*m.*) Resort; taking resort.
उलूक (*m.*) An owl.
क्षम (*Adj.*) Able.
गुणिसङ्गम (*m.*) Association with the meritorious.
नय (*m.*) The science of politics.
पार्थिव (*m.*) A king.
प्रमत्त (*pp. pass.*) Intoxicated.
प्राज्ञेतर (*m.*) A fool.
भ्रान्त (*n.*) Wandering.
महार्णव (*m.*) An ocean.
मार्जितुम् (*Inf.*) In order to wash away; to erase.
रति (*f.*) Love; liking.
लोकस्थिति (*f.*) The stability of the social order or the world.
विधि (*m.*) The Creator.
विटप (*m.*) A tree.
विषमस्थित (*Adj.*) One who is in danger.
शाठ्य (*n.*) Perfidy; villainy.
समयच्युति (*f.*) Losing the opportunity.
सम्पर्क (*m.*) Association; contact.

LANGUAGE-STUDY :—

१ वरं पर्वतदुर्गेषु भ्रान्तं वनचरैः सह ।
न मूर्खजनसम्पर्कः सुरेन्द्रभवनेष्वपि ॥

Study carefully the meaning and the use of the phrase "वरं ...न" in the above verse. The phrase means "*This is acceptable......but not that*".

The translation of the above verse will be:—

Wandering through the thickest parts of the forest in the company of the forest-dwellers *will be acceptable by all means, but not* the association with the fools even in the mansions of Indra.

सप्तदशः पाठः

गुरुसन्देशः ।

सेवकः—(प्रविश्य) देव, ऋष्यशृङ्गस्याश्रमात् अष्टावक्रः सम्प्राप्तः ।

रामः—त्वरितं प्रविशतु ।

[निष्क्रान्तः सेवकः । प्रविश्य]

अष्टावक्रः—स्वस्ति वाम् ।

रामः—मुने, अभिवादये । इत उपविश ।

सीता—मुने, नमस्ते । अपि कुशलं जामातुश्च गुरुजनस्य चार्यायाः शान्तायाश्च ।

रामः—निर्विघ्नो मे भावुक ऋष्यशृङ्ग आर्या च शान्ता ?

सीता—अस्मान् वा स्मरति ?

अष्टावक्रः—(उपविश्य) अथ किम् ! देवि, कुलगुरुर्वसिष्ठस्त्वामिदं समदिशत्—"विश्वम्भरा तव माता, प्रजापतिना समो जनकस्ते पिता—

तेषां वधूस्त्वमसि नन्दिनि पार्थिवानां
येषां कुलेषु सविता च गुरुर्वयं च ॥

तद् किमन्यद् इच्छामः ? केवलं वीरप्रसवा भव " इति ।

रामः—अनुगृहीताः स्मः ।

अष्टावक्रः—इदं चारुन्धत्या देवीभिः शान्तया च भूयो भूयः सन्दिष्टम् । यः कश्चित् गर्भदोहदो भवत्यस्याः सोऽवश्यमचिरात् मानयितव्य इति ।

रामः—तथा ।

अष्टावक्रः—ननान्दुर्भर्त्रा च सन्दिष्टम् । "वत्से, कठोरगर्भेति नानीतासि । वत्सोऽपि रामभद्रस्तव विनोदार्थमेव स्थापितः । ततः पुत्रेण सहितां त्वां द्रष्टुमिच्छामः" इति ।

रामः—तथास्तु। गुरुणा वसिष्ठेन न किञ्चित् आदिष्टोऽस्मि ?

अष्टावक्रः—आकर्णय—

जामातृयज्ञेन वयं निरुद्धा-
स्त्वं बाल एवासि नवं च राज्यम्।
युक्तः प्रजानामनुरञ्जने स्या-
स्तस्मात् सुकीर्तिः परमं धनं वः॥

रामः—यथा समादिशति गुरुर्मैत्रावरुणिः। कः कोऽत्र भोः। विश्राम्यत्वष्टावक्रः।

—उत्तररामचरितम् (Adapted)

VOCABULARY

अथ किम् (*Indecl.*) Yes.
अभि + वाद् [अभिवादयति-ते] To salute; to bow down.
आ + कर्ण् [आकर्णयति-ते] To hear.
गर्भदोहद (*m.*) The longings or the desires of pregnancy.
नन्दिनी (*f.*) A daughter.
निरुद्ध (*pp. pass*) Obstructed; stopped.
भूयः (*Indecl.*) Again.
मानयितव्य (*pot. pass. p.*) To be attended to; to be respected.
मैत्रावरुणि (*m.*) A name of Vasiṣtha.
युक्त (*pp. pass.*) Deligent; attentive.
वि + श्रम् [विश्राम्यति] To take rest.
विश्वम्भरा (*f.*) The earth.
वीरप्रसवा (*f.*) The mother of brave children.
सवितृ (*m.*) The sun.

ADDITIONAL EXERCISES:—

पाठान्तरम् :—

किं मिष्टमन्नं खर-सूकराणां ?
किं रत्नहारो मृग-मक्षिकाणाम् ?।

1 Sweet; 2 A pig; 3 A fly.

अन्धस्य दीपो ? बधिरस्य गीतं ? ।
मूर्खस्य किं शास्त्र-कथा-प्रसङ्गः ? ॥

मक्षिका व्रणमिच्छन्ति, धनमिच्छन्ति पार्थिवाः ।
नीचाः कलहमिच्छन्ति, शान्तिमिच्छन्ति साधवः ॥

गुणो भूषयते रूपं, शीलं भूषयते कुलम् ।
सिद्धिर्भूषयते विद्यां, भोगो भूषयते धनम् ॥

देवे, तीर्थे, द्विजे, मन्त्रे, दैवज्ञे, भेषजे, गुरौ ।
यादृशी भावना यस्य, सिद्धिर्भवति तादृशी ॥

विश्वास-प्रतिपन्नानां वञ्चने का विदग्धता ? ।
अङ्कमारुह्य सुप्तानां हन्तुः किं नाम पौरुषम् ? ॥

अचला कमला कस्य ? कस्य मित्रं महीपतिः ? ।
शरीरं च स्थिरं कस्य ? कस्य वश्या वराङ्गना ? ॥

किमप्यस्ति स्वभावेन सुन्दरं वाप्यसुन्दरम् ।
यद् एव रोचते यस्मै, भवेत् तत् तस्य सुन्दरम् ॥

लाभस्तेषां, जयस्तेषां, कुतस्तेषां पराजयः ?
येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः ॥

गृह-पाठ :—

1. Answer the following questions in Sanskrit :—

(अ) कुतोऽष्टावक्रः सम्प्राप्तः ?

(आ) क आदेशो वसिष्ठेन रामाय दत्तः ?

---

4 A cut; a sore; 5 A quarrel; 6 Enjoyment; 7 A fortune-teller; 8 A medicine; 9 Come; 10 Deception; deceiving; 11 Cleverness; 12 Having ascended; 13 An epithet of Laxmī, the goddess of wealth; 14 Controllable; 15 A beautiful woman; 16 A blue lotus; 17 Residing in the hearts.

(इ) सीता किमर्थं यज्ञस्थाने न नीता ?

(ई) केषां वधूः सीतासीत् ?

(उ) केन कारणेन गर्भदोहदो मानयितव्योऽस्ति नारीजनानाम् ?

2. Give the peculiarities of the following constructions:—

स्वस्ति वाम् । नमस्ते । अपि कुशलं जामातुः ?
त्वं वधूरसि । सुकीर्तिः परमं धनं वः ।

3. Paraphrase the following in Sanskrit:—

(अ) किं मिष्टमन्नं खर सूकराणाम् ?

(आ) कस्य मित्रं महीपतिः ?

(इ) भोगो भूषयते धनम् ।

APPENDIX

VERBAL DERIVATIVES

Note:—In arranging the roots in the alphabetical order the prefixes added to the roots with the plus sign have been discarded.

Roots	Past passive participles	Gerunds	Infinitives
अभिवाद्	अभिवादित	अभिवाद्य	अभिवादयितुम्
अय्	अयित	अयित्वा	अयितुम्
अर्ज्	अर्जित	अर्जयित्वा	अर्जयितुम्
अवलम्ब्	अवलम्बित	अवलम्ब्य	अवलम्बितुम्
अर्थ्	अर्थित	अर्थयित्वा	अर्थयितुम्
प्र + अर्थ्	प्रार्थित	प्रार्थ्य	प्रार्थयितुम्
आकर्ण्	आकर्णित	आकर्ण्य	आकर्णयितुम्
इष् 4. P. P.	इषित	एषित्वा	एषितुम्
अनु+इष् 4. P. P.	अन्विषित	अन्विष्य	अन्वेषितुम्
इष् 6. P. P.	इष्ट	इष्ट्वा; एषित्वा	एषितुम्; एष्टुम्
ईक्ष्	ईक्षित	ईक्षित्वा	ईक्षितुम्
अप + ईक्ष्	अपेक्षित	अपेक्ष्य	अपेक्षितुम्
उपलाल्	उपलालित	उपलाल्य	उपलालयितुम्
कथ्	कथित	कथयित्वा	कथयितुम्
कम्	कान्त	कमित्वा; कान्त्वा; कामयित्वा	कामयितुम्
कुप्	कुपित	कुपित्वा	कोपितुम्
कूज्	कूजित	कूजित्वा	कूजितुम्
कृष्	कृष्ट	कृष्ट्वा	कर्ष्टुम्; क्रष्टुम्
क्लृप्	क्लृप्त	कल्पित्वा; क्लृप्त्वा	कल्पितुम्; कल्प्तुम्
क्रम्	क्रान्त	क्रमित्वा; क्रान्त्वा	क्रमितुम्; क्रामितुम्

Roots	Past passive participles	Gerunds	Infinitives
परि+क्रम्	परिक्रान्त	परिक्रम्य	परिक्रमितुम्; परिक्रामितुम्
क्रीड्	क्रीडित	क्रीडित्वा	क्रीडितुम्
क्रुध्	क्रुद्ध	क्रुद्ध्वा	क्रोद्धुम्
क्षम्	क्षान्त	क्षमित्वा; क्षान्त्वा	क्षमितुम्; क्षन्तुम्
क्षि	क्षित; क्षीण	क्षित्वा	क्षेतुम्
क्षिप्	क्षिप्त	क्षिप्त्वा	क्षेप्तुम्
खेल्	खेलित	खेलित्वा	खेलितुम्
गण्	गणित	गणयित्वा	गणयितुम्
गद्	गदित	गदित्वा	गदितुम्
गम्	गत	गत्वा	गन्तुम्
अव+गम्	अवगत	अवगम्य; अवगत्य	अवगन्तुम्
आ+गम्	आगत	आगम्य; आगत्य	आगन्तुम्
गै	गीत	गीत्वा	गातुम्
ग्रस्	ग्रस्त	ग्रसित्वा; ग्रस्त्वा	ग्रसितुम्; ग्रस्तुम्
चर्	चरित	चरित्वा	चरितुम्
उप+चर्	उपचरित	उपचर्य	उपचरितुम्
चल्	चलित	चलित्वा	चलितुम्
चिन्त्	चिन्तित	चिन्तयित्वा	चिन्तयितुम्
जन्	जात	जनित्वा	जनितुम्
प्र + जन्	प्रजात	प्रजन्य; प्रजाय	प्रजनितुम्
जि	जित	जित्वा	जेतुम्
वि + जि	विजित	विजित्य	विजेतुम्
जीव्	जीवित	जीवित्वा	जीवितुम्
जृम्भ्	जृम्भित	जृम्भित्वा	जृम्भितुम्
तप्	तप्त	तप्त्वा	तप्तुम्
सम् + तप्	सन्तप्त	सन्तप्य	सन्तप्तुम्
तर्क्	तर्कित	तर्कयित्वा	तर्कयितुम्

Roots	Past passive participles	Gerunds	Infinitives
तुल्	तुलित; तोलित	तोलयित्वा	तोलयितुम्
तुष्	तुष्ट	तुष्ट्वा	तोष्टुम्
सम्+तुष्	सन्तुष्ट	सन्तुष्य	सन्तोष्टुम्
त्यज्	त्यक्त	त्यक्त्वा	त्यक्तुम्
त्रै	त्रात; त्राण	त्रात्वा	त्रातुम्
त्वर्	त्वरित; तूर्ण	त्वरित्वा	त्वरितुम्
दय्	दयित	दयित्वा	दयितुम्
दह्	दग्ध	दग्ध्वा	दग्धुम्
दा	दत्त	दत्त्वा	दातुम्
आ+दा	आत्त	आदाय	आदातुम्
दिश्	दिष्ट	दिष्ट्वा	देष्टुम्
उपदिश्	उपदिष्ट	उपदिश्य	उपदेष्टुम्
धृ 1. P. P.	धृत	धृत्वा	धर्तुम्
धृ 10 P. P.	धारित	धारयित्वा	धारयितुम्
ध्यै	ध्यात	ध्यात्वा	ध्यातुम्
नम्	नत	नत्वा	नन्तुम्
परि+नम्	परिणत	परिणम्य; परिणत्य	परिणन्तुम्
निन्द्	निन्दित	निन्दित्वा	निन्दितुम्
नी	नीत	नीत्वा	नेतुम्
परि+नी	परिणीत	परिणीय	परिणेतुम्
निषूद्	निषूदित	निषूद्य	निषूदयितुम्
नृत्	नृत्त	नर्तित्वा	नर्तितुम्
पच्	पक्व	पक्त्वा	पक्तुम्
पठ्	पठित	पठित्वा	पठितुम्
पत्	पतित	पतित्वा	पतितुम्
परि+पाल्	परिपालित	परिपाल्य	परिपालयितुम्
पा	पीत	पीत्वा	पातुम्
पार्	पारित	पारयित्वा	पारयितुम्

Roots	Past passive participles	Gerunds	Infinitives
पीड्	पीडित	पीडयित्वा	पीडयितुम्
पुष्	पुष्ट	पुष्ट्वा	पोष्टुम्
पूज्	पूजित	पूजयित्वा	पूजयितुम्
प्रकाश्	प्रकाशित	प्रकाश्य	प्रकाशितुम्
प्रच्छ्	पृष्ट	पृष्ट्वा	प्रष्टुम्
आ+प्रच्छ्	आपृष्ट	आपृच्छ्य	आप्रष्टुम्
प्रथ्	प्रथित	प्रथयित्वा	प्रथयितुम्
बुध् 4. P. P.	बुद्ध	बुद्ध्वा	बोद्धुम्
बुध् 1. P. P.	बुधित	बुधित्वा; बोधित्वा	बोधितुम्
भक्ष्	भक्षित	भक्षयित्वा	भक्षयितुम्
भज्	भक्त	भक्त्वा	भक्तुम्
भाष्	भाषित	भाषित्वा	भाषितुम्
भू	भूत	भूत्वा	भवितुम्
अनु+भू	अनुभूत	अनुभूय	अनुभवितुम्
भूष्	भूषित	भूषयित्वा	भूषयितुम्
मन्	मत	मत्वा	मन्तुम्
मह्	महित	महयित्वा	महयितुम्
मार्ग्	मार्गित	मार्गयित्वा	मार्गयितुम्
मिल्	मिलित	मिलित्वा; मेलित्वा	मेलितुम्
मुच्	मुक्त	मुक्त्वा	मोक्तुम्
मुद्	मुदित; मोदित	मुदित्वा; मोदित्वा	मोदितुम्
मुह्	मुग्ध; मूढ	मुग्ध्वा; मूढ्वा मुहित्वा; मोहित्वा	मोहितुम्; मोग्धुम् मोढुम्
मृ	मृत	मृत्वा	मर्तुम्
याच्	याचित	याचित्वा	याचितुम्
रक्ष्	रक्षित	रक्षित्वा	रक्षितुम्
रच्	रचित	रचयित्वा	रचयितुम्
रभ्	रब्ध	रब्ध्वा	रब्धुम्

Roots	Past passive participles	Gerunds	Infinitives
आ+रभ्	आरब्ध	आरभ्य	आरब्धुम्
रम्	रत	रत्वा	रन्तुम्
वि+रम्	विरत	विरम्य; विरत्य	विरन्तुम्
रुच्	रुचित	रुचित्वा	रोचितुम्
रुह्	रूढ	रूढ्वा	रोढुम्
आ + रुह्	आरूढ	आरुह्य	आरोढुम्
लभ्	लब्ध	लब्ध्वा	लब्धुम्
लङ्घ्	लङ्घित	लङ्घित्वा	लङ्घितुम्
लज्ज्	लज्जित	लज्जित्वा	लज्जितुम्
लिख्	लिखित	लिखित्वा	लेखितुम्
लोक्	लोकित	लोकयित्वा	लोकयितुम्
अव + लोक्	अवलोकित	अवलोक्य	अवलोकयितुम्
वद्	उदित	उदित्वा	वदितुम्
वप्	उप्त	उप्त्वा	वप्तुम्
वस्	उषित	उषित्वा	वस्तुम्
वह्	ऊढ	ऊढ्वा	वोढुम्
विध्वंस्	विध्वस्त	विध्वस्य	विध्वंसितुम्
विलस्	विलसित	विलस्य	विलसितुम्
विश्	विष्ट	विष्ट्वा	वेष्टुम्
प्र+विश्	प्रविष्ट	प्रविश्य	प्रवेष्टुम्
विश्रम्	विश्रान्त	विश्रम्य	विश्रमितुम्
विस्मि	विस्मित	विस्मित्य	विस्मेतुम्
वृत्	वृत्त	वृत्त्वा; वर्तित्वा	वर्तितुम्
वृध्	वृद्ध	वृद्ध्वा; वर्धित्वा	वर्धितुम्
शङ्क्	शङ्कित	शङ्कित्वा	शङ्कितुम्
शप्	शप्त	शप्त्वा	शप्तुम्
शुभ्	शोभित	शोभित्वा	शोभितुम्
शुष्	शुष्क	शुष्ट्वा	शोष्टुम्

Roots	Past passive participles	Gerunds	Infinitives
सद्	सन्न	सत्त्वा	सत्तुम्
नि+सद्	निषण्ण	निषद्य	निषत्तुम्
सह्	सोढ	सहित्वा; सोढ्वा	सहितुम्; सोढुम्
सान्त्व्	सान्त्वित	सान्त्वयित्वा	सान्त्वयितुम्
स्मृ	स्मृत	स्मृत्वा	स्मर्तुम्
वि+स्मृ	विस्मृत	विस्मृत्य	विस्तुर्मम्
सृ	सृत	सृत्वा	सर्तुम्
सेव्	सेवित	सेवित्वा	सेवितुम्
स्था	स्थित	स्थित्वा	स्थातुम्
उत् + स्था	उत्थित	उत्थाय	उत्थातुम्
उप + स्था	उपस्थित	उपस्थाय	उपस्थातुम्
स्निह्	स्निग्ध; स्नीढ	स्निहित्वा; स्नेहित्वा; स्निग्ध्वा; स्नीढ्वा	स्नेहितुम्; स्नेग्धुम्; स्नेढुम्
स्पृह्	स्पृहित	स्पृहयित्वा	स्पृहयितुम्
हस्	हसित	हसित्वा	हसितुम्
हृ	हृत	हृत्वा	हर्तुम्
वि + हृ	विहृत	विहृत्य	विहर्तुम्
ह्वे	हूत	हूत्वा	ह्वातुम्
आ + ह्वे	आहूत	आहूय	आह्वातुम्

GLOSSARY

अ

अखिल (*Adj.*) All.

अगार (*n.*) A house; a store-house.

अग्नि (*m.*) The god of fire.

अङ्क (*m.*) The lap.

अङ्कुर (*m.*) A sprout.

अङ्गना (*f.*) A woman.

अचिरात् (*Indecl.*) Soon; quickly.

अञ्जलि (*m.*) A handful.

अतः (*Indecl.*) Hence.

अतिगौरव (*m.*) Great honour.

अतिशीत (*Adj.*) Very cold.

अतिशोक (*m.*) Excessive grief.

अतीव (*Indecl.*) Exceedingly; very much.

अत्यन्तम् (*Indecl.*) Exceedingly; very much.

अत्र (*Indecl.*) Here.

अत्रान्तरे (*Indecl.*) In the mean-while.

अथ (*Indecl.*) Now; then. [Generally opens a new topic.]

अथवा (*Indecl.*) Or.

अदस् (*Pron.*) This or that. [Generally refers to what is at some distance.]

अदान (*n.*) Not giving.

अद्य (*Indecl.*) To-day.

अद्यापि (*Indecl.*) Even to-day.

अधः (*Indecl.*) Below. [Used with the Genitive of a noun.]

अधिक (*Adj.*) Additional; more.

अधिकृत्य (*Ger.*) About; concerning. [Used with the Accusative of a noun.]

अधिगम् [1. P. P. अधिगच्छति] To obtain; to get.

अधिप (*m.*) The lord; the master.

अधिराज (*m.*) The over-lord.

अधिवास (*m.*) An abode; a dwelling place.

अधुना (*Indecl.*) Now.

अनन्तरम् (*Indecl.*) After that.

अनल (*m.*) The god of fire.

अनिल (*m.*) The wind.

अनुगत (*pp. pass.*) Followed.

अनुगृहीत (*pp. pass.*) Obliged; favoured.

अनुरञ्जन (*n.*) pleasing; humouring.
अनुव्रत (*pp. pass.*) followed.
अनुसृ [1. P. P. अनुसरति] To follow.
अनुस्था [1. P. P. अनुतिष्ठति] To do; to carry out.
अन्तर्धान (*n.*) Disappearing.
अन्ते (*Indecl.*) In the end.
अन्न (*n.*) Food.
अन्य (*Pron.*) Another.
अन्यथा (*Indecl.*) Otherwise.
अन्वय (*m.*) A family.
अन्विष्य (*Ger.*) Having searched.
अपमान (*m.*) Insult.
अपर (*Pron.*) Another.
अपरपक्ष (*m.*) The other (second) fortnight.
अपवृत्त (*Adj.*) One leading an objectionable mode of life.
अपहृ [1. P. P. अपहरति] To take away (by force).
अपि (*Indecl.*) Even.
अपेक्ष् [1. A. P. अपेक्षते] To desire; to wish.
अप्रवासगमन (*n.*) Not going on a journey; keeping home.
अभयङ्कर (*Adj.*) Destroyer of fear.
अभिजात (*Adj.*) Noble.
अभिधान (*n.*) A name.
अभिमान (*m.*) Pride; self-respect.
अभिराम (*Adj.*) Beautiful.
अभिवाद् [U. P. अभिवादयति-ते] To bow; to salute.
अभिषिक्त (*pp. pass.*) crowned; installed as a king.
अभूमि (*f.*) An unfit place; absence of scope.
अमात्य (*m.*) A minister.
अमृत (*n.*) The nectar.
अम्बा (*f.*) A mother.
अय् [1. A. P. अयते] To go.
अयि (*Indecl.*) Oh !
अये (*Indecl.*) Oh !
अयोध्या (*f.*) The name of a city.
अरिष्टा (*f.*) The name of a woman.
अरुण (*Adj.*) Reddish; tawny.
अरुन्धती (*f.*) The name of Vasiṣtha's wife.
अरे (*Indecl.*) Oh !
अर्क (*m.*) The sun.
अर्ककिरण (*m.*) A ray of the sun.
अर्ज् [10. U. P. अर्जयति-ते] To earn; to obtain.
अर्थ (*m.*) Use; wealth; meaning.
अर्धचन्द्र (*m.*) Seizing by the neck and expelling.

अर्भक (*m.*) A child.

अलम् (*Indecl.*) Enough; a match for. [Used with the Instrumental of a noun in the sense '*enough*' and with the Dative of a noun in the sense '*a match for*'.]

अलङ्कार (*m.*) An ornament.

अल्प (*Adj.*) Little; small.

अवगम् [1. P. P. अवगच्छति] To understand; to know.

अवतार (*m.*) The descent; the advent.

अवनत (*pp. pass.*) Bent.

अवन्तीपीठ (*n.*) The University of Avantī.

अवबुध् [1. P. P. अवबोधति] To know; to understand.

अवलम्ब् [1. A. P. अवलम्बते] To depend upon.

अवलोक् [10. U. P. अवलोकयति–ते] To see.

अवलोकित (*pp. pass.*) Seen.

अवलोक्य (*Ger.*) Having seen.

अवशिष्ट (*pp. pass.*) The remainder; what is left behind.

अवश्यम् (*Indecl.*) Necessarily.

अवसर (*m.*) Leisure; scope; time.

अवसान (*n.*) The end; the close.

अवस्था [1. P. P. अवतिष्ठति] To stand; to stay.

अवस्थातुम् (*Inf.*) For the purpose of staying; in order to stay.

अविघ्न (*n.*) Freedom from obstacles.

अविचार्य (*Ger.*) Without thinking.

अविनय (*m.*) Rudeness; immodesty.

अविनीत (*Adj.*) Rude; immodest.

अविवेक (*m.*) Want of Judgement; indiscrimination.

अश्रु (*n.*) A tear.

अष्टम (*Adj.*) The eighth.

अस् [2. P. P. अस्ति] To be.

असती (*f.*) A bad or wicked woman.

असित (*Adj.*) Black; dark.

असु (*m.*) Life. [Always in the plural.]

असुख (*n.*) Absence of happiness; misery.

अस्मद् (*Pron.*) I or we.

अष्टावक्र (*m.*) The name of a sage.

अहो (*Indecl.*) Oh!

आ

आकर्ण् [10. U. P. आकर्णयति-ते] To hear.

आकार (*m.*) Form; shape.
आकाश (*m.* & *n.*) The sky.
आकृति (*f.*) Form; shape.
आकृष् [6. P. P. आकृषति; 1. P. P. आकर्षति] To drag; to plough.
आकृष्य (*Ger.*) Having dragged or ploughed.
आगत (*pp. pass.*) Arrived; come.
आगत्य (*Ger.*) Having come.
आगम् (1. P. P. आगच्छति] To come.
आचर् [1. P. P. आचरति] To perform; to do.
आचरण (*n.*) Performance.
आचर्य (*Ger.*) Having performed.
आज्ञा (*f.*) An order; a command.
आज्ञाफल (*n.*) The fruit (result) of which is the ability to order; the fruit (result) of order.
आतप (*m.*) The sunshine.
आत्मजा (*f.*) A daughter.
आदाय (*Ger.*) Having taken or obtained.
आदिश् [6. P. P. आदिशति] To order; to command.
आदिष्ट (*pp. pass.*) Ordered; commanded.
आदेश (*m.*) An order; a command.
आधार (*m.*) The support.
आधिपत्य (*n.*) Over-lordship.
आनन्द (*m.*) Joy.
आनीत (*pp. pass.*) Brought.
आपतित (*pp. pass.*) Befallen.
आपन्न (*pp. pass.*) Reached; reduced (to a state.)
आपण (*m.*) The market; a shop.
आपात (*m.*) A fall; a sudden appearance.
आप्रच्छ् [6. A. P. आपृच्छते] To take leave of. [The root प्रच्छ् is ordinarily *parasmai-padin*. The prefix आ has changed its *pada*.]
आम् (*Indecl.*) Ah ! I see !
आयुष्य (*n.*) The duration of life.
आरभ् [1. A. P. आरभते] To begin.
आरब्ध (*pp. pass.*) Begun; started.
आरभ्य (*Ger.*) Having begun.
आराधन (*n.*) Worship.
आराधयितुम् (*Inf.*) For the purpose of worshipping or courting.
आराध्य (*Ger.*) Having worshipped or courted.
आरोग्य (*n.*) Good health.

आर्जव (*n.*) Straightforwardness; frankness.
आर्य (*m.*) An Āryan; a respectable person.
आर्यपुत्र (*m.*) A term of address in Sanskrit used by women with reference to their husbands.
आर्यावर्त (*m.*) The land of the Āryans.
आलय (*m. & n.*) A house.
आलवाल (*n.*) A basin for water round the root of a tree.
आलिङ्गन (*n.*) An embrace.
आह्लादक (*Adj.*) Gladdening.
आवश्यक (*Adj.*) Essential; necessary.
आह्वे [1. P. P. आह्वयति] To invite; to call.
आह्वे [1. A. P. आह्वयते] To challenge.
आश्चर्य (*n.*) A wonder.
आश्चर्यम् (*Indecl.*) Wonderful !
आश्रमविरुद्धम् (*Indecl.*) Against the rules of the hermitage.
आश्रित्य (*Ger.*) Having taken the support.
आसन (*n.*) A seat.
आसाद्य (*Ger.*) Having reached.
आहार (*m.*) Food.
आहूय (*Ger.*) Having called or invited.

इ

इच्छा (*f.*) A desire.
इतर (*Pron.*) Another; the other.
इतः (*Indecl.*) Hence.
इतस्ततः (*Indecl.*) Hither and thither.
इति (*Indecl.*) So; thus. [Used to end a direct quotation.]
इदम् (*Pron.*) This.
इन्दु (*m.*) The moon.
इन्द्र (*m.*) The lord of gods.
इव (*Indecl.*) Like; as if.
इष् [4. P. P. इष्यति] To search.
इष् [6. P. P. इच्छति] To desire.

ई

ईदृश (*Adj.*) Of this kind; such. [The feminine base of this is ईदृशी.]
ईश्वर (*m.*) God; The Almighty.

उ

उक्त (*pp. pass.*) Said; spoken.
उक्ति (*f.*) A saying; an utterance.
उक्त्वा (*Ger.*) Having said.
उग्र (*Adj.*) Terrible; unbearable.
उच्छिष्ट (*pp. pass.*) What is left over; the remainder.
उटज (*m. & n.*) A hut; a cottage.

उत्कृत्य (*Ger.*) Having cut or carved.

उत्तर (*Adj.*) The next; the following.

उत्तरेण (*Indecl.*) To the north. [Used with the Accusative of a noun.]

उत्थित (*pp. pass.*) Arisen.

उत्पत् [1. P. P. उत्पतति] To jump up.

उत्पादयितुम् (*Inf.*) In order to create or produce.

उत्पाटन (*n.*) Removing; rooting out.

उत्सुक (*Adj.*) Eager. [Used with the Instrumental or the Locative of a noun.]

उत्स्था [1. P. P. उत्तिष्ठति] To stand; to get up.

उदधि (*m.*) The sea.

उदय् [1. U. P. उदयति-न्ते] To rise.

उदय (*m.*) The rise.

उदर (*n.*) The stomach.

उद्भूत (*pp. pass.*) produced; arisen.

उद्यान (*n.*) A garden.

उन्मत्त (*pp. pass.*) Intoxicated; arrogant.

उपकार (*m.*) An obligation; a favour.

उपकृत (*pp. pass.*) Obliged; favoured.

उपगत (*pp. pass.*) Approached.

उपगम् [1. P. P. उपगच्छति] To approach.

उपयोग (*m.*) The use.

उपलभ् [1. A. P. उपलभते] To obtain; to get.

उपलाल् [10. U. P. उपलालयति-न्ते] To fondle; to caress.

उपविश् [6. P. P. उपविशति] To sit.

उपविश्य (*Ger.*) Having sat.

उपविष्ट (*pp. pass.*) Seated.

उपस्था [1. A. P. उपतिष्ठते] To wait upon; to worship.

उपस्थित (*pp. pass.*) Approached; come.

उपहृ [1. P. P. उपहरति] To offer.

उपाय (*m.*) A remedy.

उप्त (*pp. pass.*) Sown.

उभ (*Pron.*) Both.

उभय (*Pron.*) Both.

उभयतः (*Indecl.*) On both sides. [Used with the Accusative of a noun.]

उलूक (*m.*) An owl.

ऋ

ऋषि (*m.*) A sage.

ऋषिकुमार (*m.*) A son of a sage.

ऋष्यशृङ्गाश्रम (*m.*) The hermitage of Ṛisyaśṛinga.

ए

एक (*Pron.*) One.

एकत्र (*Indecl.*) Together; in all.

एकदा (*Indecl.*) Once.

एकवारम् (*Indecl.*) Once.

एकादश (*Adj.*) The eleventh.

एतद् (*Pron.*) This.

एव (*Indecl.*) Only.

एवम् (*Indecl.*) Thus; in this way.

ओ

ओषधि (*f.*) A herb.

औदार्य (*n.*) Generosity.

औरस (*Adj.*) Once own (with reference to a child.)

क

कथ् [10. U. P. कथयति-ते] To tell. [Used with the Dative of the person to whom something is told.]

कथम् (*Indecl.*) How?

कथा (*f.*) A story.

कनकमृग (*m.*) A golden deer.

कनिष्ट (*Adj.*) Younger.

कन्यका (*f.*) A girl; a daughter.

कन्या (*f.*) A girl; a daughter.

कठोरगर्भा (*f.*) A woman in an advanced stage of pregnancy.

कपट (*m.* & *n.*) Fraud.

कपोत (*m.*) A pigeon.

कम् [1. A. P. कामयते] To love; to desire for.

कमल (*n.*) A lotus.

कमलयोनि (*m.*) The Creator.

कमलिनी (*f.*) A lotus plant.

करीरविटप (*m.*) A kind of tree.

कर्ण (*m.*) An ear.

कर्तव्य (*n.*) Duty; what should be done.

कर्मसमृद्धि (*f.*) An increase in the performance of the Vedic rites such as the performance of sacrifices.

कर्षण (*n.*) Ploughing; dragging.

कला (*f.*) A fine art.

कष्टमय (*Adj.*) Full of troubles or difficulties.

काल (*m.*) Time.

कालिदास (*m.*) The name of a Sanskrit poet.

कारण (*n.*) A cause; a reason.

कार्य (*n.*) A work; duty.

काव्य (*n.*) A poem.

काशी (*f.*) The name of a city; modern Benares.

किन्तु (*Indecl.*) But.

किम् (*Pron.*) Who or what.

किम् (*Indecl.*) What is the use of—[Used with the Instrumental of a noun.]

किं पुनर् (*Indecl.*) Much less; much more.

किं प्रयोजनम् (*Indecl.*) What is the use of—[Used with the Instrumental of the thing used and the Genitive of the user.]

किमर्थम् (*Indecl.*) Why ?

किरण (*m.*) A ray.

किल (*Indecl.*) Indeed !

कीट (*m.*) An insect.

कीटक (*m.*) An insect.

कुक्कुट (*m.*) A cock.

कुतः (*Indecl.*) Whence ?

